The description proper begins from Kaṇakanagarī—the city of the *Gandharvas*—undoubtedly an imaginary one on the Malaya hills i.e. roughly the southern part of the Western Ghats. Leaving the Malaya hills the wind is asked to pass through the Pāṇḍya country which is represented as having been at a distance of four miles only from the Malaya range. This distance seems to be a rough one which only indicates that Malaya was on the borderland of the Pāṇḍya territorry and not included within it. The capital of the Pāṇḍya land is stated to have been Uragapura on the Tāmraparṇī which is also mentioned by Kālidāsa as such.[1] The name Uragapura seems, on phonetic grounds, to be identical with Urayur which, however, is neither on the Tāmraparṇī (as Uragapura is stated to be) nor is known to have been a Pāṇḍya capital from any other source. It is however well-known as having for a long time been the capital of the Cholas. Of the two important Pāṇḍya capitals known to history—Madurā and Korkai—the latter was at the mouth of the Tāmraparṇī. And we are not sure if Uragapura has been confounded with this Korkai, or Urāyur was actually a Pāṇḍya capital at some time of which we have got no authentic history. It is also not known if Uragapura has any connection with Argeirou, a town mentioned by Ptolemy to have been included within the land of Pandion or the Pāṇḍya country.[2] Leaving Uragapura the wind is

1. *Raghuvams'a VI.* 59, 60.

2. Mc. Crindle, *Aucient India as described by Ptolemy*—p. 59.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

asked to go to the Adam's Bridge where at Rāmes'varam it will see the image of the god S'iva.

The next place to be visited by the wind is Kānchīpura-(mod. Conjeeveram)—'the ornament of the southern direction.'—undoutedly for the fact of its having been, at the time of the poet, the capital of the Chola kings who were in the ascendancy at the time in the whole of Southern India. Chola ladies of Kānchī are referred to in verse 14.

From verse 13 it appears that Kāñchī was on the banks of the river Subalā. At the present day we find no trace of any such river existing in or near modern Conjeeveram which is on the river Palar. We are not sure if Subalā can be identified with the Palar on phonetic grounds. Dravidian languages having no sonant mute the Dravidian pronunciation of the Sanskrit word *bala* would naturally be *pala.* If that be the case there may be some connection of Palar with Subalā. But in our opinion Subalā may more reasonably be identified with the Vegavatī near the town of modern Conjeeveram 'from the subterranean springs of which river water is obtained and supplied to the town.'[1] Vegavatī may quite naturally be supposed to be a synonym of the word Subalā, '*vega*' and '*bala*' in the case of a river meaning the same thing viz. its swiftness. However, these are mere guesses and cannot be accepted until strong proofs to support them are forthcoming.

Leaving Kānchī the wind is asked to follow the course of the river Kāverī. It is however difficult to understand how the wind on its northerly course from Kāñchī could follow the Kāverī which is much to the south of the former town and not to its north. But it seems from his reference

1. *Imperial Gazetteer*—Vol. *X* (1908) p. 378

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

to the Keralas that the poet here speaks of the upward course of the Kāverī so that the wind following its course could reach the land of the Keralas though it would be a most roundabout way for it to take up. The non-mention of the river on the way to Kānchī from Malaya—where its mention would naturally be expected—is probably due to an oversight of the poet ; but as such an important river could not be left out of account it is mentioned even in an awkward position like the present one.

The wind next has to turn to the east as it is asked to pay a visit to the Mālyavat hill which is identified with the curved lines of hills in the neighbourhood of Kupal, Mudgal and Raichur near Bellary.[1] The next place to be visited by the wind is the Pañchāpsara lake. It appears to have been somewhere to the east of Mālyavat. Its location, however, is not certain. The only fact known about it is that it was to the east of Vidarbha or Berar.[2]

It is curious that of all important places associated with Rāma's exile the poet makes mention of only two—the Mālyavat hill and the Pañchāpsara lake—without making any mention of Janasthāna, Daṇḍakāraṇya, Kiṣkindhyā, Ṛṣyamukha etc.

Passing through the Andhra[3] country through which flows the Godāvarī river the wind is asked to bend its course

---

1. *Journal Royal Asiatic Society*—1894—p. 256-7.

2. *op. cit.* p. 246.

3. I read Andhrān in place of *randhrān* the reading given by both the Mss. The region between the Godāvarī and Kṛṣṇā Districts being known as the Andhra territory and the Godāvarī being expressly mentioned here it seems that the Andhra country is meant.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

towards Kaliṅganagarī (v. 21) which is said to have been the capital of the Kaliṅga country. From verse 22 the town appears to have been not far away from the sea. The description of the king of Kaliṅga as given by Kālidāsa[1] also leads us to infer that it was on the sea-shore.

Its identification with Mukhaliṅgam in the Ganjam District which is not far from the sea shore seems to have been conclusively proved. It was the capital of the Eastern Gaṅga kings of Kaliṅga. There seems to be no strong reasons in favour of upholding the original identification of this capital with Kaliṅgapaṭam simply on the ground that it agrees more faithfully with the description of poets[2]; for such descriptions need not be taken literally.

From Kaliṅganagarī the wind has to advance direct north and reach the Vindhyan region presumably somewhere near the Amarakaṇṭaka hill where the river Narmadā has its rise. Thus just after its visit to the Vindhya range, the wind is asked to go to the Narmadā. The Bhillas are mentioned as inhabiting the Vindhya region. Their connection with that region is also attested to by the *Kathāsaritsāgara* (XIII. 32-42). They were a wild mountain race, probably the ancestors of the Bhils who live in the Vindhya hills, in the forests of Malwa, Mewar, Khandesh etc.

Women of the S'abaras are mentioned in the Vindhyan region in verse 25. They are known to have been wild tribes dwelling in that region. Bāṇa's *Kādambarī*[3] refers to them in that

---

1. *Raghuvams'a* VI. 53 56, 2. *Orissa in the making*—B. C. Majumdar—p. 37-8. *Epigraphia Indica*—IV. 187-8.

3. शबरसेनापतिभिरभिहन्यमानकेशरिशता......विन्ध्याटवी । *Kādambarī* (Peterson's edition), p. 19.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

locality. The *BrhatSamhitā* places them in the South-eastern division of India which comprised of, among other tracts, the Vindhyan region. It distinguishes two classess of this people—the *nagnas'abaras* (naked S'abaras) and the *parna-s'abaras* (leaf-clad or leaf-eating S'abaras).[1]

The wind next has to pass through Yayātinagarī which appears from epigraphic records to have been on the river Mahānadī. It was sought to be identified with Jajpur which being on the river Vaitaraṇī the identification has been proved to be untenable.[2] It is now supposed to be identical with Vinīta-pura (modern Binkā) a small town in the Sonepur State, Central Provinces. The name Yayātinagara was apparently imposed upon Vinītapura during the reign of Yayāti, otherwise known as Mahās'ivagupta.[3]

The Keralīs are mentioned as living on the Kāverī (*v.* 16) as also in Yayātinagarī. According to Prof. Bhandarkar the Keralas were originally a northern people, who, as is known from the Aitareya Āraṇyaka[4], were settled not far from Magadha. These according to him, were probably the Cheros of the Mirzapor Dt. U. P. And the mention of the Keralas in Yayātinagar is interpreted by him to refer to one of their movements to the south before they were settled in Malabar.[5]

From Yāyātinagari the wind has to reach Suhma or south-west Bengal. Suhma was one of the divisions into which Bengal

1. *Brhatsamhitā XIV.* 10.
2. Epigraphia Indica—Vol III, p. 355.
3. *Ibid* Vol. XI. p. 189.   4. II. 1. 1.
5. *As'oka*—p. 41. Dr. H. C. Roychoudhury however makes to me an alternative suggestion according to which the mention of Keralīs in Yayatinagara may only be a reference to a settlement of Keralī courtezans there.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

was divided;—the other divisions were Puṇḍra including Varendrī, Vaṅga, including Samataṭa and Uttara-Rāḍha.

In the description of Suhma we have mention of a temple of Viṣṇu (*v.* 28). We have also reference to the town of S'iva (*v.* 29) and to the temples of the Sun and Ardhanārīs'vara (*v.* 30). It is very difficult to trace the ruins—if there be any—of these ancient monuments and to identify them satisfactorily. It is also not easy to determine whether the town of S'iva refers to an actual town like Shibpur in modern Howrah district in Bengal. A bridge constructed probably by Ballālasena is referred to in verse 31.

The wind next has to go to Triveṇī (in Hugli Dt.) where the Yumnā issues from the Ganges and does not join the latter as at Allahabad. It is to be noted that here we have no mention of the famous port of Saptagrāma or Sātgaon to which frequent references are met with in medieval Bengali works in course of descriptions of journeys from Bengal to Ceylone. But we are not sure if the port had risen to eminence during the time of Lakṣmaṇsena.

The wind is next asked to go to Vijayapura—the capital of Lakṣmaṇasena (*v.* 36). It is represented as having been both a camp (*Skandhāvāra*) and a capital (*rājadhānī*) of the king. The identification of this capital town has been the fruitful source of a good deal of controversy among scholars. According to some it has to be identified with Vijayanagara in Rajshahī,[1] while according to others it is identified with Nadia.[2]

1. *Gauḍarājamālā* p. 75.
2. J. A. S. B—1905 p. 45.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

From the description of the capital as it appears in the *Pavanadūta* we can gather that it was probably included in Suhma and that it was on the banks of the Ganges. We also learn that it was to be reached after visiting Triveṇī which thus seems to have been to the south of the capital. All these pieces evidence combined point to the Nadia region as the probable of locality which included Vijayapura within it. Muhamudan historians also mention Nodiah (probably identical with Nadia) as a capital of Lakhmaniyā—probably the same person as our Lakṣmaṇasena.[1] A large mound locally known as the Ballāla-ḍhibi in the village of Bamanpukur in Nadia is believed to be the remnant of the palace of Ballālasena and a tank near by the mound called the Ballāladīghi may be identical with the one referred to in verse 54 of our poem. As to the second identification put forward by some scholars it should be said that it does not seem to have anything in its favour except the similarity of the two names—Vijayanagara and Vijayapur, and a local tradition of doubtful credibility. The fact of the former place being near Deopara the find-spot of a stone inscription of Vijayasena cannot possibly indicate that this particular place is the site of the capital of king Lakṣmaṇasena.

We need not also dismiss as unauthentic the statement of Dhoyī that Vijayapura was *a* capital of Lakṣmaṇasena. It may not be improbable that he too, like many other kings, had several capitals or rather seats of government e.g. Lakṣmaṇāvatī, Vijayapura, Vikramapura etc. of which the last alone is found to have been referred to in the epigraphic records so far available.

---

1. *Tabakat-I-Nasiri* (Raverty's translation)—p. 554.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

SUPPLEMENTARY NOTE.

Verses attributed to Dhoyī in works of anthology but not found in the Pavanadūta. *

सदुक्तिकर्णामृते—

दरविगलितदूर्व्वादुर्व्वलामङ्गलेखां
ग्लपयति न यदस्याः श्वासजन्मा हुताशः ।
स खलु सुभग मन्ये लोचनद्वन्द्ववाराम्
अविरतपटुधारावाहिनीनां प्रभावः ॥ (क)

—धोयीकस्य ।

आरब्धा मकरध्वजस्य धनुषे तस्यास्तनुर्वेधसा
त्वद्विश्लेषविशेषदुर्बलतया जाता लतावद्धनुः ।
तत् संप्रत्यपि (?) हे[1] प्रसीद किमपि प्रेमामृतस्यन्दिनीं
दृष्टिं नाथ विधेहि सा रतिपतेः शिञ्जापि सञ्जायताम् ॥(ख)

—धोयीकस्य ।

तस्यास्त्वदेकमनसः स्मरबाणवर्षैः
कार्श्यं वपुः शठ बिभर्त्ति यथा यथैव ।

---

* The verses are taken, as already pointed out, from J. A. S. B.—1906—pp. 18ff. the text published wherein (indicated in the footnotes by M.) has been corrected after a fresh and careful collation of the Asiatic Society and Sanskrit College Manuscripts of the *Saduktikarṇāmṛta*. (indicated in the footnotes respectively by S and A)

(क) This has a parallel in *Pavana*. 75.

(ख) This has a parallel in *Pavana*. 66.

1. वे—A, S, M ; but it gives no sense.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्तोकायितश्चेयतयैव[1] तथा तथैव
कान्तिर्घनीभवति दीर्घविलोचनायाः ॥

—धोयीकस्य ।

न क्रीड़ागिरिकन्दरेषु रमते नोपैति वातायनं
दूराद् द्वेष्टि गुरु' निरस्यति लतागारे विहारस्पृहाम् ।
आस्ते सुन्दर सा सखीप्रियगिरामाश्वासनैः केवलं
प्रत्याशां दधती तया च हृदयं तेनापि च त्वां पुनः ॥

—धोयीकस्य ।

संरुद्धाः कथमप्यमङ्गलभयात् पक्ष्मान्तरव्यापिनोऽ
प्युत्तालीकृतलोचनं निपुणया वाष्पाम्भसां विन्दवः ।
न्यस्यन्त्याः सहकारपल्लवमथ व्यानम्य पत्युः पुरो
धारावाहिभिरेव लोचनजलैर्यात्राघटः पूरितः ॥

—धोयीकस्य ।

आजन्मव्यवसायिना क्रतुशतैराराध्य पुष्पायुधं
केनाकारि पुरा तनूदरि तनुत्यागः प्रयागभ्रमे ।
यस्यार्थे सखि लोलनेत्रनलिनीनालायमानस्खलद्-
वाष्पाम्भःपतनान्तरालवलितग्रीवं पथः पश्यसि ॥

—धोयीकस्य ।

यत् पुष्णासि पिकान् [2]अकारणरिपूनध्यन्यवामभ्रुवां
यच्चाच्छिद्य बलिं विलुम्पसि करात् सर्वं सहिष्ये तव ।

---

1. तयैव—A. S. तथैव—M. The reading here which is hopelessly corrupt gives rise to a fault in the metre.

2. करिण—M. अकारण—A, S.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हंहो [1]मद्वचनादितस्त्वयि गते शाखान्तरं वायस
क्षेमेणाद्य समागमिष्यति स चेत् [2]कान्तश्चिरप्रोषित: ॥

—धोयीकस्य ।

प्रयासि यत् कुण्डलचक्रधारया
विपाटयन्तीव घनं निशातम: ।
तदद्य कर्णायतलोचनोत्पले
फलेग्रहि: कस्य मनोरथद्रुम: ॥

—धोयीकस्य ।

रोमावली सत्रिवलीतरङ्ग-
[3]नाभिह्रदस्योपरि राजतेऽस्या: ।
मुखेन्दुभीतस्तनचक्रवाक-
[4]वक्त्राच्युता शैवलमञ्जरीव ॥

—धोयीकस्य ।

अहन्तनीयानतिकोमलस्य
स्तनद्वयं वोढुमलं न तावत् ।
इतीव तत्संवहनार्थमस्या:
वलित्रयं पुष्यति मध्यभाग: ॥

—धोयीकस्य ।

तासां पीनस्तनकलसयो: स्थूलमुक्ताभिरामा
वेणीभूता[5] स्त्रिवलिविषमे [6]तिर्य्यगायामभाज: ।

---

1. मा—A. M. म—S.
2. कान्त—A: S. कान्ता—M.
3. —नाभिह्र—M. —नाभिक्र (?)—A. S.
4. —वक्त्र—A. —वभ्रु—S. वक्त्रे—M.
5. —भूता—S. —ह्वता—M.
6. तीर्थगायामभाज:—M. तीर्य्यगायामभाज:—S.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वक्त्रे[1] लोलालकविलुलिताः केतकक्षोदलक्ष्मीं
प्राप्ताः[2] क्रीड़ावनविहरणे विन्दवः स्वेदवाराम् ॥ (क)

—धोयीकस्य ।

बिभ्राणास्तोयलग्नं वसनमरसनादामनि[3] श्रोणिभारे
दूरादन्योन्यसाचि स्मितचतुरसखीकामिभिर्वीक्ष्यमाणाः[4] ।
उत्तेरस्तोरलेखां विपुलकमलिनीपत्रमीषद्विलग्ना
वक्षोजाग्रेषु कृत्वा हरिणशिशुदृशो वीतचीनांशुकेषु ॥

—धोयीकस्य ।

प्रियायाः प्रत्यूषे गलितकवरीबन्धनविधा-
वुदञ्चद्दो र्वल्लीदरचलितलोलाञ्चलमुरः[5] ।
वनाद्भूते[6] पश्यत्यथ मयि समन्दाञ्चहसितं
नमन्त्यास्तद्रूपं यदि लिखितुमीशो मनसिजः ॥

—धोयीकस्य ।

यत्र तत्र[7] रतिसज्जबन्धकीप्रीतये मदनशासनादिव ।
नीलकान्तपटतामुपाययौ सूचिभेद्यनिविड़ं निशातमः ॥

—धोयीकस्य ।

(क) This has a parallel in *Pavana*. v. 74.

1. वक्त्रे—M. वक्षे—S.
2. प्राप्ताः—A. M. S.
3. —वसनादामनि—M.
4. —वमाणाः—M. —क्ष्यमाणाः—S.
5. —मुरः (?)—A.—स्वरुः—S. —स्वरः—M.
6. घनाद्भूते—A. घनाद्भुते—S. वनाद्भुते—M. The reading is hopelessly corrupt here.
7. यति सखु—M. रतिसज्ज—S. रतिसजू—A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्षौणीन्द्र त्यजति क्षमां त्वयि रणे दोःशालिनोऽप्यक्षमाः
प्रत्यर्थिष्वथ कम्पमानतनुषु त्वय्यानुकम्पाकुलः ।
त्वं गृह्णासि भुवः करं मृगदृशामितेऽपि च स्वर्भुवां
तेभ्यस्तेऽभ्यधिकं नु किं गुणिभिरभ्युद्गीयते यद् भवान् ॥

—धोयीकस्य ।

निद्राजिह्मदृशः सखिष्वपि सवैलक्ष्या नखाङ्कव्रण-
व्यादष्टां शकलेखया प्रतिपदं शीत्कारिवक्त्रेन्दवः ।
त्वत्सेवासमुपागतक्षितिभुजां निर्यान्ति लीलागृहाद्
एताः प्रौढ़रतिश्रमप्रशिथिलैरङ्गैः कुरङ्गीदृशः ॥

—धोयीकस्य ।

पश्चात् खुरद्वितयखण्डितभूमिभाग-
[1]मूर्द्धीकृताग्रचरणद्वयसुप्रक्षेपम्[2] ।
मूर्द्धावगाहनविहस्तनिजाश्वरावम्
आराज्जनः परिजहार खलन्तुरङ्गम्[3] ॥

—धोयीकस्य ।

कृतशीकरवृष्टि केशरैरसकृत्[4] स्कन्धमवन्धुरं धुवन्[5] ।
अपिबच्चरणाग्रताड़ितं तुरगः[6] पङ्किलमापगापयः ॥

1. मूर्द्धी—M. A.—मूर्द्धी (?)—S.
2. —द्वेषम्—M.—क्षेपम्—S.
3. —स्तुरङ्गम्—M.—न्तुरङ्गम्—A, S.
4. —वसकृत्—M.—रसकृत्—A. S.
5. वन्धुरं धुवन्—S. वन्धवन्धुरन्—M.
6. तुरगः—S. तुरग—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जह्लनक्षतायां सुभाषितमुक्तावल्याम्—

निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि ।
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी[1] ॥ (क)

—गोई धोईकविराज ।

शार्ङ्गधरपद्धतौ—

छिन्त्से ब्रह्मशिरो यदि प्रथयसि प्रेतेषु सख्यं यदि
क्षीवः क्रीड़सि मातृभिर्यदि रतिं धत्से श्मशाने यदि ।
सृष्ट्वा संहरसि प्रजा यदि तथाप्याधाय भक्त्या मनः
कं सेवे करवाणि किं त्रिजगती शून्या त्वमेवेश्वरः ॥

—धोईकवेः । (ख)

(क) Quoted in *Sāhityadarpaṇa* VIII. 15 without the name of the author.

(ख) Peterson's edition—No. 1161. P. 189. Ascribed to Umāpatidhara in the *Saduktikarṇāmṛta*.

1. —वी—M.—वी—S.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भूमिका ।*

विक्रमादित्यस्य इव गौड़ाधिपस्य परमेश्वर-परमभट्टारक-परमवैष्णवमहाराजाधिराजस्य कविवरस्य श्रीमतो लक्ष्मण-सेनस्यापि सभामण्डपं रत्नभूतैः पण्डितप्रकाण्डै र्विमण्डितमासीदिति विदितचरमेवानेकेषाम्। तथा च स्मार्त्तप्रवरा वङ्गगौरवभूताः पशुपतिहलायुधप्रभृतयः, कविप्रवीणा कोमलपदावलीविन्यासपटवो जयदेवादयः, वैयाकरणकेशरिणो भाषावृत्तिर्निर्माणलब्धकीर्त्तयः पुरुषोत्तमदेवमहाभागा अन्ये च बहव स्तेन प्रोत्साहितास्तदीयां सभां समलङ्कुर्वन्तः समासत। श्रूयते च यथा विक्रमादित्यस्य सभायां 'नव रत्नानी'व तस्यापि सभायां पञ्च रत्नानि व्यराजन्त येषु च रत्नेषु चान्तर्भूतं कविवरेण धोयीकेनापि। तथा च समुत्कीर्णं आसीद् अधस्तनः श्लोकस्तदीयसभामण्डपद्वारि इति श्रूयते—

'गोवर्द्धनश्च शरणो जयदेव उमापतिः।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च॥' इति

उपरितनश्लोकीयकविराजशब्दो लक्ष्मणसेनसभालङ्कारभूतं कं नाम पण्डितप्रकाण्डं सूचयतीति न निःसंशयं प्रतिपादितं केनापि पुरातत्त्वानुशीलनरसिकेन। पुरुषोत्तमदेवकृत'भाषातत्त्व'-ग्रन्थभूमिकायां 'राघवपाण्डवीय'-प्रणेत्रा कविराजेन एतच्छ्लोकगतस्य कविराजस्य ऐक्यं समुपन्यस्तं श्रीमता श्रीशचन्द्रचक्रवर्त्ति-महोदयेन।† परं राघवपाण्डवीयकाव्यकर्त्त्रा कविराजेन कादम्ब-कुलतिलकचक्रवर्त्तिवीरकामतेवप्रोत्साहितेनैव स्वं काव्यं विरचित-मिति राघवपाण्डवीयपुष्पिकातो ज्ञायते इति लक्ष्मणसेन-

---

* परिषदो मासिकाधिवेशने वाचितं 'धोयी कविः' इति मदीयं निबन्धमालम्ब्यैव विरचितेयं भूमिका। विस्तरस्तु आङ्गलभूमिकायामेव सर्वमालोचितम्। आङ्गल-भाषानभिज्ञानां वाचकवराणां सुखबोधार्थं दिग्दर्शनमात्रमत्र क्रियते।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

† भाषावृत्तिः—Introduction P. 6.

सभाकविना कविराजेन तस्य ऐक्यप्रतिपादनं कथं वा सङ्गच्छेत ? अस्माभिस्तु एवमनुमीयते यथाच्च कविराजशब्देन पवनदूतकर्त्तुः धोयीकवेरेव सूचनं कृतमिति। न च न धोयीकवेः कविराज-संज्ञायां किमपि मानमस्तीति शङ्कनीयम्। कविना स्वयमेव स्वीये पवनदूते 'कविक्ष्माभृतां चक्रवर्त्ती' इति पदेन (१०१तमे श्लोके) पवनदूतपुष्पिकायाञ्च 'धोयीकविराज' इति नाम्ना कविराज इति विरुदस्य सूचितत्वात्। जयदेवेनापि गीतगोविन्दाख्यकाव्यस्य चतुर्थे श्लोके 'धोयी कविक्ष्मापति'रिति वचनेन एतस्य कविराज-संज्ञा प्रकटीकृता सम्यगेव। परमुररीकृतेऽपि धोयीकवेः कविराज इति विरुदे विरुदद्वारेव कथमेतस्य सूचनं कृतमत्र श्लोके इति सन्देहे ब्रूमो यथा नैषा काचन नवीना शैली यद् विरुदद्वारेणैव कस्यचित् सूचनमिति। एवञ्च केचन महात्मानोऽधुना विरुद-मुखेनैव तथा प्रथां गता इह जनसमाजे यथा तेषां नाम प्रायेण विस्मृतमेव। तथा च चतुरुदधिसलिलास्वादितयशसो विपुल-विक्रमा राष्ट्रकूटकुलतिलकाः श्रीमन्तोऽमोघवर्षदेवपादा इदानीं अमोघवर्षेत्यादि विरुदेनैव परिचीयन्ते इतिहासालोचिभिर्न च तेषां नाम समुपलभ्यते कुत्रचिदपि लेखे। एवञ्च भारतगौरवभूतानां कणादादीनां संज्ञादिकम् इदानीं न केषामपि गोचरं सुधियाम्। अन्ये च जगन्नाथादयः पण्डितराजादिविरुदमुखेनैव समधिकं प्रसिद्धिं गता इति विरुदद्वारा यदि सूचनं धोयीकवेस्तत्र न किमपि चित्रम्। अपरञ्च एतत्कवेः लक्ष्मणसेनसभापण्डितत्वं गीतगोविन्दटीका-कृद्भि र्महाराजकुम्भादिभिरप्युररीकृतम्। तथा च कविरयं लक्ष्मणसेनराज्यकाले ख्रीष्टीयद्वादशशताब्द्यां प्रादुर्बभूवेति निर्णेतुम् अलम्भवामो वयम्।

धोयीकविप्रणीता ग्रन्थाः—

धोयीकविप्रणीतम् 'पवनदूतम्' इत्येकमेव खण्डकाव्यमिदानी-मुपलभ्यते। परमयमिदमेकमेव विरचय्य खण्डकाव्यं परम-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गौरवनिदानभूतं 'कविराज'-लाञ्छनं समधिगतवान्, गौड़ेश्वर-लक्ष्मणसेनसकाशाच्च 'दन्तिव्यूहं कनकलतिकां चामरं हेमदण्डञ्च' गौरवातिरेकद्योतकं सम्प्रापेति चित्रमिव प्रतिभाति। सम्भाव्यते च एतदीयकविराजविरुदेन 'वाक्सन्दर्भाः कतिचिदमृतस्यन्दिनो निर्म्मितास्च' इति पवनदूतगतैतदीयवचनेन च यथानेन इदानीमनुपलभ्यमानान्यपि कानिचन निर्म्मितानि काव्यानि येषां गुणगणसमाकृष्टेन लक्ष्मणसेनेनास्य प्रविहिता समुचिता सम्मानना। सदुक्तिकर्णामृतशार्ङ्गधरपद्धतिप्रभृतिषु धोयीकवित्वेनोपन्यस्ताः पवनदूतबहिर्भूता विंशतिः श्लोकाः एवमेव केषाञ्चन काव्यान्तराणामेवांशा भवेयुरित्यनुमिनुमः। न च सूक्तिग्रन्थेषु धोयीकवित्वेन समुपस्थापितानां 'पवनदूत'गतानां पवनदूतातिरिक्तानां वा श्लोकानां समुन्यासवेलायां ग्रन्थस्य कस्याप्युल्लेखो दृश्यते धोयीकृतस्य। धोयीकवित्वेन चोपन्यस्तास्ते श्लोका इतः पूर्वमेवात्र ग्रन्थे एकत्र संनिवेशिताः।

धोयीकाव्यस्य गुणागुणाः।

धोयीकविसमकालीनानां तदीयकवित्वविषये कीदृशी आसीत् धारणा इति तु प्रथमतस्तावदालोचनीयम्; अनन्तरञ्चात्र विषये अस्मदीयं मतं प्रकटयामः। जयदेवीयगीतगोविन्दकाव्ये च तात्कालीनकविवर्य्याणां वर्णनगर्भः समुपलभ्यते कश्चन श्लोको 'वाचः पल्लवयती'त्यादि। एष च श्लोक स्तात्कालीनकवीनां दोषप्रदर्शनमय इति व्याख्यातं टीकाकृद्भिः। तथा चोक्तं रसमञ्जर्य्यामेतत्श्लोकव्याख्यानावसरे धोयीकविमाश्रित्य यथा—'धोयी कविक्ष्मापतिः। धोयीनामा कविराजः श्रुतिधरः श्रुतिः श्रवणं तन्मात्रादेव हृदयग्राही। तस्योच्चारितमात्रग्राहित्वमेव न सत्कवितायां कौशल्यमिति भावः। महाहङ्कारकथनाय राजोपमा। तथाहङ्कारादेव स्वस्य कविराजपदवीमानीतवान्। सत्कविमध्ये तु तस्य गणनापि नेति भावः' इति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

परं धोयीकवेः कविराज इति विरुदः श्रुतिधर इति संज्ञा च केवलं तस्य आत्माभिमानं निन्दाञ्च गमयतीति तत्काव्यालोचनपुरःसरं न वयमुररीकर्त्तुमलं भवामः तदीयकाव्ये महाकविसमुचितानां गुणानां बाहुल्येन सद्‌भावात्। न च महाकविमात्राधिगम्यस्य कविराजलाञ्छनस्य लक्ष्मणसेनसभायाम् अयोग्येन केनचिद् उपयोग कृत इति कथमपि सम्भवेत् विश्वासपदं वा गच्छेत्। न वा लक्ष्मणसेनेन केवलमात्माभिमानैकसहायस्य कस्यचित् गुणहीनस्य दन्तिव्यूहादिभिः सभाजनं सम्पादितमिति प्रतीयुः केचन बुद्धिमन्तः। यत् सत्यं धोयीकृते पवनदूते कालिदासानुकरणं प्रतिपदमेव स्फुटीभवति वाचकानाम्। परं तत्रापि परमोत्कर्षद्योतकानि महाकवित्वसूचकानि च बहून्येव वस्तूनि वयमुपलभामहे। सूक्तिग्रन्थेषु च समुपलभ्यमानेष्वपि धोयीकृतश्लोकेषु बहव एव विलसन्ति गुणा इति सर्व्वैरेव स्वीकार्य्यं काव्यरसिकैः। तथा च कविनानेन ग्रन्थान्तरस्याप्रणीतत्वेऽपि एतस्य कविराजपदं न सर्व्वथा अनुचितम् इत्यस्माकं सम्मतम्। एवञ्च टीकाकृद्भिः कुम्भादिभिः समुदभावितो धोयीकवेर्दोषराशि स्तत्कृतानां काव्यानामनालोचनजन्य इति जयदेवस्य प्रशंसातिरेकद्योतनार्थं समुपन्यस्त इति वा न तत्राग्रहवन्तो वयं धोयीकृतौ दोषानवाविष्कुर्म्मः केवलम्। इतःपूर्वं भूमिकान्तरे समुद्धृतेभ्यश्च हितेभ्य एव श्लोकेभ्यः श्लोकांशेभ्यश्च वाचकमहाभागाः स्वयमेव धोयीकवेर्गुणदोषान् विचारयितुमलम्भविष्यन्ति समग्रं ग्रन्थमनधीयाना अपि।

धोयीकृतं पवनदूतम्।

दूतकाव्यानीति रमणीयानि खण्डकाव्यानि समुपपादयन्ति किमपि वैशिष्ट्यं संस्कृतसाहित्यस्य। तत्र चेदानीमुपलभ्यमानेषु दूतकाव्येषु कालिदासप्रणीतम् मेघदूतं नाम प्रसिद्धं वस्तु एव प्रधानतमं प्राचीनतमं च पदमधिकुर्वत् विराजते। यच्च नाम मनोहरं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मेघदूतमनुसृत्य बहुभिरेवार्वाचीनैः कविभिर्विरचितानि विविधानि दूतकाव्यानि मेघपवनहंसादीनां दौत्यम् उपवर्णयद्भिः। यत् सत्यं न तान्यर्वाचीनानि वस्तूनि गुणगरिम्णा कथञ्चिदपि कालिदासीय-वस्तुना तुलनामप्यर्हन्ति। परमेतदप्यङ्गीकरणीयमेव यथा तेष्वप्य-नेकेषु मनोहराः काव्यगुणा बाहुल्येनैव विलसन्ति सुतराम्। संगृहीतञ्च मया पञ्चत्रिंशत एतादृशानां विवरणम्। न च तेषां सर्व्वेषामेव समयादिकं निर्णीतं निःसंशयम्। यावत्त्वस्माभिर्ज्ञायते तावता त्वेवम् अनुमानं न दुष्टं प्रतिभाति यथेदं पवनदूतमेव तेषु प्राचीनतममिति। वस्तु चेदं गौड़ीयानां परमादरास्पदं गौड़ा-धीश्वरस्य लक्ष्मणसेनस्य वृत्तान्तोऽत्र तदीयसभापण्डितेन केनचिदुप-निबद्ध इति। अखिलेषु चोपलभ्यमानेषु दूतकाव्येषु स्थानमस्य परमगौरवास्पदमेवात्र गुणानां विविधानामेव समुपलम्भात्। वैशिष्ट्यं चात्र एतदपि उत्पश्यामो यथात्र ऐतिहासिकपुरुषप्रवर एव नायकत्वेनोपस्थापितो न तु प्रायेणान्यत्र सकलेषु दूतकाव्येष्विव कल्पितः कश्चिद् विषयीक्रियते नायक इहेति। न चात्र वङ्गीयकवि-कृतेषु इतरेषु प्रायेण सर्व्वेषु दूतकाव्येष्विव वैशिष्ट्यानवगाहि कृष्णराधाप्रेम एवाधिक्रियते विषयत्वेन।

एवं बहुवैशिष्ट्यगुम्फितमिदं काव्यं गौड़ाधिपसेनान्वयकुल-तिलकश्रीमन्महाराजलक्ष्मणसेनदेवपादानां सविधे मलयपर्व्वत-कृताधिवासया कुवलयवत्या नाम गन्धर्वकन्यया लक्ष्मणसेनानुरक्त-चित्तया पवनरूपस्य दूतस्य प्रेषणमुपवर्णयति।

पवनदूतस्यैतिहासिकत्वम्।

इदं नाम पवनदूतं लक्ष्मणसेनकृतं दाक्षिणात्यविजयं सूचयति। तथा च दाक्षिणात्यक्षितीशान् विजित्य प्रत्यावर्त्तमानं तं प्रत्यक्षीकृत्यैव मलयपर्व्वतस्था कुवलयवती मदनवाणैर्निपीड्यमाना बभूवेति एतद्-ग्रन्थादुपलभ्यते। परमेतद्दाक्षिणात्यविजयवृत्तान्त ऐतिहासिकं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA


वस्तु कविकल्पना वा न तत्रास्ते निश्चयः कोऽपि। अधिगम्यमानेषु तावदेतद्राजस्य ताम्रशासनपट्टकेषु न कोऽपि वर्त्तते निर्द्देश एवं-विजयस्य कस्यापि। उत्तरतो प्रयागवाराणसीपर्य्यन्तं पूर्व्वतः कामरूपं यावत् दक्षिणतश्च कलिङ्गपर्य्यन्तं तेन विजितो भूभाग इति ताम्रशासनेभ्य एव तदीयेभ्यो निर्णेतुमलं भवामो वयम्। परं मलयं यावत्तेन प्रयातं न वेति यद्यपि नोल्लिखितं ताम्रशासनेषु तथापि लक्ष्मणसमकालीनधोयीकविना समुपनिबद्धं मलयपर्व्वतं यावदेतस्य समरयात्राविवरणम् स्वाश्रयभूतलक्ष्मणसेनगौरवातिरेक-प्रतिपादनमात्रप्रयोजनं सर्व्वथा असत्यमित्युपेक्ष्यमंशतः सत्यमिति ग्राह्यं वेत्यत्र न सुशको निर्णयः।

पवनदूते भौगोलिकं विवरणम् :—

भौगोलिकविवरणविषये बहु ज्ञातव्यं समुपनिबद्धमत्र पवनदूते दूतान्तरेषु केषुचिदिव मलयपर्व्वततो गौड़ं यावत् पवनेनाश्रयणीय-मार्गस्यात्र सम्यग्विवरणसुखेन। तत्र नास मार्गविवरणे मार्गगतानां बहूनां मन्दिरादीनां द्रष्टव्यवस्तूनां इदानीमनुपलभ्यमानानामुपवर्णनं तात्कालिकजनपदादिसंस्थानञ्च सम्यगेव समुपनिबद्धमुपलक्ष्यते यन्नाम विवरणं प्राचीनभारतीयजनपदादिसंस्थानज्ञानविषये महान्त-मेवोपकारं साधयति भारतपुरातत्त्वालोचननिपुणानाम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पवनदूतम्



अस्ति श्रीमत्यखिलवसुधासुन्दरे चन्दनाद्रौ
गन्धर्वाणां कनकनगरी नाम रम्यो निवासः ।
[1]हैमैर्लीलाभवनशिखरैरम्बरं व्यालिखद्भि-
र्धत्ते शाखानगरगणनां यः सुराणां पुरस्य ॥ १ ॥

तस्मिन्नेका कुवलयवती नाम गन्धर्वकन्या
मन्ये जैत्रं मृदु कुसुमतोऽप्यायुधं या स्मरस्य ।
दृष्ट्वा देवं भुवनविजये लक्ष्मणं क्षौणिपालं
बाला सद्यः कुसुमधनुषः संविधेयीबभूव ॥ २ ॥

बाल्येष्वालीष्वपि मनसिजं सानभिव्यञ्जयन्ती
पाण्डुक्षामा कतिचिदनयत् कातरा वासराणि ।
गन्तुं देशान्तरमथ मधावन्यथैव प्रवृत्तं
गाढोत्कण्ठा मलयपवनं सप्रणामं ययाचे ॥ ३ ॥

१। चन्दनाद्रौ मलयपर्व्वते। उत्तुङ्गैर्हैममयैः क्रीड़ागृहशिखरैर्यो निवासोऽमरावती-साहश्यं भजत इति भावः।

२। जैत्रं जयशीलम्। क्षौणिपालं नरपतिम्। लक्ष्मणं लक्ष्मणसेनाख्यं गौड़ाधिपम्। संविधेयीबभूव वशगा जाता। एतेन लक्ष्मणसेनस्य सौन्दर्य्यातिरेको व्यज्यते।

३। 'आलिः सखी वयस्या च' इत्यमरः। वसन्ते मलयानिल उत्तरतो गौड़ाभिमुखं प्रवहतीति अनन्तरङ्गमपि तं कुवलयवती ययाचे कामपीड़ातिशय्यादिति भावः।

---

1. हैमै—M. हैमै—A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्वत्तः प्राणाः सकलजगतां दक्षिणस्त्वं प्रकृत्या
जङ्घालं[1] त्वां पवन ! मनसोऽनन्तरं व्याहरन्ति ।
तस्मादेव त्वयि खलु मया संप्रणीतोऽर्थिभावः
प्रायो भिक्षा भवति विफला नैव युष्मद्विधेषु ॥ ४ ॥

वीक्ष्यावस्थां[2] विरहविधुरां रामचन्द्रस्य हेतो-
र्यातः पारं पवन ! सरितां पत्युरप्याञ्जनेयः ।
तत्तातस्याप्रतिहतगतेर्यास्यतस्ते मदर्थं
गौड़ी क्षौणी[3] कति नु मलयक्ष्माधराद् योजनानि ॥५॥

तत्रावश्यं कुसुमसमये स त्वया शीलनीयः
सान्द्रोद्यानस्थगितगगनप्राङ्गणो[4] गौड़देशः ।
तन्मेऽवस्थां कथय नृपतेर्जीवनत्राणहेतोः
प्रादुर्भावस्त्रिजगति खलु त्वादृशानां परार्थः ॥ ६ ॥

स्नात्वानर्घ्यं परिमलमितश्चन्दनानोकहानां[5]
तूर्णं तावद् विसृज[6] मलयोपत्यकाकाननानि ।

---

४ । 'जङ्घालोऽतिजवः' इत्यमरः । 'दक्षिणे सरलोदारौ' इत्यमरः । अथच दक्षिणो दक्षिणदिग्गामी । अनन्तरम् अभिन्नम् ।

५ । सरितां पत्युः समुद्रस्य । आञ्जनेयः अञ्जनायाः पुत्रो हनुमान् इति यावत् । तत्तातस्य तस्य हनुमतस्तातस्य जनकस्य पवनस्य भवत इति यावत् । गौड़ी गौड़देशीया क्षौणी भूमिः ।

६ । कुसुमसमये वसन्तकाले शीलनीयो द्रष्टव्यः वसन्तकालस्य कामोद्दीपकत्वादिति भावः । 'जीवनत्राणहेतोरर्थान्मम, यद्वा नृपतेर्विशेषणम्' (A)

---

1. जङ्घान'—R. जङ्घालं—M and A.
2. वीक्षावस्था—R. वीक्ष्यावस्था—M, A, H.
3. गौड़क्षौणि—A. गौड़ीक्षौणि—M. 4. णो—A, H. —ने—M.
5. —हकानां—R. —कहानां—A and M. 6. वसृज—A. विसृज—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यावन्नैते निधु[1]वनकलाकेलिभाजो भुजङ्गा
भोगव्याजाच्चुलुकचुलुकं[2] मत्सरात्त्वां पिबन्ति ॥ ७ ॥

श्रीखण्डाद्रेः परिसरमतिक्रम्य गव्यूतिमात्रं
गन्तव्यस्ते किमपि जगतीमण्डनं पाण्ड्य[3]देशः ।
तत्र ख्यातं पुरमुरगमित्याख्यया ताम्रपर्ण्या
स्तीरे मुग्धक्रमुकतरुभिर्वद्धरेखे[4] भजेथाः ॥ ८ ॥

सम्भोगान्ते श्लथभुजलतानिःसहानां वधूनां
व्याधुन्वन्तोऽनुचितकवरीभारमव्याजमुग्धम् ।
अस्मिन् सद्यः श्रमजलनुदः सौधजालैरुपेत्य
प्रत्यासन्ना मलयमरुतस्तालवृन्तीभवन्ति ॥ ९ ॥

क्रीडाशैलं भुजगनगरीयोषितां कौतुकञ्चेत्
सेतुं याया जलधिकरिणः[5] शृङ्खलादाम दीर्घम् ।

७। निधुवनं मैथुनम् । चुलुकम् गण्डूषम् । मत्सरा अन्यशुभद्वेषिणः, भुजङ्गानां स्वभावकौटिल्यादिति भावः ।

८। श्रीखण्डाद्रेः मलयपर्व्वतस्य । "गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरः । उरगपुरम् इति ताम्रपर्णीसरित्तीरवर्त्ती पुरविशेषः । क्रमुकतरुभिरुपलक्षिते इति शेषः ।

९। अस्मिन् उरगपुरे इति यावत् ।

---

1. —धि—R. —धु—A.
2. —लकं—R. —लुकं—M and A.
3. —ण्ड—M. —ण्ड्य—A.
4. —खेभ—A. —खैर्भं—M.
5. —किरणः—M. —करिणः—A. कारिणः—H.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भाति स्नेहादवनितनया[1]जीवना[2]श्वासहेतो
र्लङ्काद्वीपं प्रहित इव यो बाहुरेक:[3] पृथिव्या: ॥ १० ॥

क्रुध्यद्गौरीकर[4]किशलयाक्लिष्टचूडासुधांशो
र्द्रक्ष्यस्युच्चै: कुल[5]मकलुषं तत्र रामेश्वरस्य ।
मध्यं[6] यत्र त्रिवलिविषमं वारसीमन्तिनीनां
हस्तोत्कम्प्यं कथयति विधे: सृष्टकाञ्चीपदस्य ॥ ११ ॥

लीलागारै[7]रमरनगरस्यापि गर्व्वं हरन्तीं
गच्छे: काञ्चीपुरमथ दिशो भूषणं दक्षिणस्या: ।
नक्तं यत्र प्रहरिक इवोज्जागरं नागराणां
कुर्व्वन् पाणि[8]प्रणिहित[9]धनुर्जायते पञ्चबाण: ॥ १२ ॥

१०। भुजगनगरो उरगपुरम्। सेतुं सेतुबन्धम्। अवनितनया जानकी लङ्कायामपहृता इति शेष:।

११। कुलं गृहम्। रामेश्वरस्य तन्नाम्न: शिवस्य। त्रिवलि: मांससङ्कोचजन्यं रेखात्रयम्। तनुमध्या मनोहराकारा वाराङ्गना अत्र विराजन्ते इति भाव:।

१२। पञ्चबाणो मदनो यत्र काञ्चीपुरे रात्रौ हस्तधृतधनुर्नागराणां प्रहरिकत्वं सम्पादयति। रात्रौ तत्र नागरिका निर्बाधं कामासक्ता भवन्तीति भाव:।

---

1. —लया—R. —नया—M, H and A.
2. —नश्वास—M and A. —नाश्वास—H.
3. —कं—M. —क:—A, H.
4. —कर—Omitted in R but is found in A and is supplied in M
5. —फल—R. —पद—M. —कुल—A.
6. मेध्यं—R. मध्यं—M and A. 7. —गैरै—R. —गारै—M and A.
8. —प्राणि—R. —पाणि—A and M.
9. —हत—R. —हित—M and A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आवर्त्त[1] लीला[2]विहसितमिव श्यावतामभ्युपेते[3]
सद्यः फेनव्यतिकरमिषादर्पयत्यंशुकान्तम् ।
अभ्भःक्रीड़ाकुतुकरभसभ्रष्टचीनोत्तरीये
यन्नारीणामुरसि सुवला वीचिहस्तैः सखीव ॥ १२ ॥

मन्ये मोक्षः कठिनसुरतायासलब्धस्य तूर्णं
दुष्प्रापस्ते[4] पवन भविता चोलसीमन्तिनीभ्यः ।
के वा तासामलकरचनालीननीलो[5]सनाथे
गण्डाभोगे मलयजपयःपिच्छिले न स्खलन्ति ॥ १४ ॥

हित्वा काञ्ची[6]मविनय[7]वतीभक्त[8]रोधोनिकुञ्जां
तां कावेरीमनुसर खगश्रेणिवाचालकूलाम् ।

१३। 'श्यावः स्यात् कपिशः' इत्यमरः। अभ्युपेते उरसीत्यस्य विशेषणम्। "कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम्" इत्यमरः। व्यतिकरः सङ्गः। 'रभसो वेगहर्षयोः' इत्यमरः। 'व्याजो मिषं छलं छद्म' इति वैजयन्ती। सुवला एतन्नाम्नी काञ्चीपुरसन्निहिता नदी जलकेलिसक्तानां काञ्चीपुरस्त्रीणाम् उन्मुक्तोरःस्थलं फेनजालेनाच्छादयति इति सा वीचिरूपहस्तैः फेनरूपं वस्त्रमर्पयतीति कविरुत्प्रेक्षते।

१४। मलयजरजःपिच्छिले चन्दनरसार्द्रे। 'आभोगः परिपूर्णता' इत्यमरः। आर्द्रे प्रदेशे स्खलनमेव स्वाभाविकम्।

---

1. —वर्त्ती—R and A. —वर्त्त'—M.
2. —खि—R. —ली—M and A.
3. —ते—A. —ता—M.
4. —ष्पापस्ते—R. —ष्प्राप्रस्ते—M and A.
5. —लीललीला—R. —नीललीला—M. —लीढ़लोलो—A.
6. किंची—R. काञ्ची—M and A.
7. —लय—R. —नय—M and A.
8. —भ्रमु—A. भु—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कान्ताश्लेषादपि खलु सुखस्पर्शमिन्दुत्विषोऽपि
स्वच्छं भिक्षाप्रवण[1]मनसोऽप्यम्बु यस्या लघीयः ॥ १५ ॥

या गङ्गेव प्रकृतिसुभगा जायते केरलीनां
केलिस्नाने कुचमलयजैः पाण्डिमानं दधाना ।
शश्वद्[2]गोत्रस्खलनजनितत्रासलोलस्य सिन्धो-
रुद्वीचिभ्रूश्चरणपतनप्रेमवाचां रसज्ञा ॥ १६ ॥

तस्या लीलासरित इव ताः स्रोतसि श्रोणिदघ्ने[3]
तोयक्रीड़ां यदि विदधते दाक्षिणात्यास्तरुण्यः[4] ।
वीचिक्षेपैः स्तनपरिसरेष्वस्तहारेषु तासां
मुक्ताजालं रचय तदपां विन्दुभिः कुन्दगौरैः ॥ १७ ॥

स्निग्ध[5]श्यामं गुरुभिरुपलैः पर्व्वतं माल्यवन्तं
पश्येरुत्तम्भित[6]मिव पुरः केशपाशं पृथिव्याः ।

---

१५ । 'कूलं रोधश्च' इत्यमरः । यस्याः कावेर्य्याः अम्बु जलं कान्ताश्लेषादपि सुखस्पर्शम्, इन्दुत्विषोऽपि स्वच्छं, भिक्षाप्रवणमनसोऽपि लघीय इत्यन्वयः ।

१६ । उद्वीचिभ्रूरुन्नता वीचिरूपा भ्रूर्यस्यास्तादृशी कावेरी नामस्खलनसम्भ्रमवस्तेन सिन्धुना समुद्रेण कृतानां चरणपतनादीनां रसज्ञा इत्यन्वयः । 'गोत्रं नाम अथच पर्व्वतः । चरणपतनं गङ्गापक्षे विष्णुचरणात् पतनम् ।' (A)

१७ । 'कटिः श्रोणिः ककुद्मती' इत्यमरः । श्रोणिदघ्ने श्रोणिपरिमिते । 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति दघ्नच् प्रत्ययः । अस्तहारेषु अस्तः क्षिप्तो हारो यतस्तेषु । कुन्दं पुष्पविशेषः तद्वत् गौराणि शुभ्राणि तैः । जलविन्दव एव मौक्तिकशोभां तन्वन्त्विति भावः ।

---

1. ल—R and A. ण—M. The marginal note in A has 'प्रबलं महत्' ।

2. स्वश्वद—R. शश्वद—M and A.

3. —दघ्ने—A. —दाघ्ना—M. 4. —ण्याः—A.

5. —ग्धा—R. —ग्ध—M and A. 6. —तम्भित—R. त्तम्भित—M and A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तत्राद्यापि प्रतिझ्भर[1]जलैर्जर्जराः प्रस्थभागाः
सीताभर्त्तुः पृथुतरशुचः सूचयन्त्यश्रुपातान् ॥ १८ ॥

रम्योपान्तं सरल[2]तरुभिर्माण्डकर्णेः[3] सरस्तद्
गच्छेः पञ्चाप्सर इति हृतप्रौढ़तापं मघोनः ।
यत्राद्यापि त्रिदशतरुणीमुग्धसङ्गीति[4]माला
पूर्वप्रेमोपगतहरिणश्रेणिमुत्कण्ठयन्ति ॥ १९ ॥

क्रीड़ाशोकक्रमुकवहुलारामरम्योपकण्ठाः
संपत्स्यन्ते पथि पथि तव प्रीतये प्रस्थितस्य ।
पीनोत्तुङ्गस्तनभरनमत्पामरीप्रेमलोभात्
निर्विच्छेदभ्रमितपथिकाः पल्लयः पल्ल[5]लिन्यः ॥ २० ॥

(?)अन्ध्रान्[6] हित्वा जनपद[7]वधूगाढ़गोदावरीकान्
कालिङ्गस्यानुसर नगरीं नाम तां राजधानीम् ।

१८। उत्तम्भितम् वर्द्धितम्। पृथुतरशुचो गभीरशोकपरीतस्य सीताविरहादिति शेषः। सीताभर्त्तुः रामस्य अश्रुपातान् माल्यवत्पर्व्वतावस्थानवेलायाम् इति शेषः।

१९। एतत्सरस उत्पत्तिविवरणम् 'इदं पञ्चाप्सरो नाम निर्म्मितं माण्डकर्णिना' इत्यादिरामायणारण्यकाण्डैकादशसर्गसन्दर्भादवगन्तव्यम्।

२०। क्रीड़ाशोकैः क्रमुकैः गुंवाकतरुभिश्च वहुला प्रचुरा ये आरामाः उपवनानि तैः रम्याः उपकण्ठाः समीपवर्त्तिप्रदेशाः। पल्लविन्यः पल्लवयुक्ताः पल्लयः स्वल्पग्रामाः।

---

1. —सर—R and A. भर—M. 2. —स—A. —त—M.

3. —मांसकर्णैः—M. —मंत्सकर्णैः—A. But in the Rámáyaṇa we read माण्डकर्णि as the name of the Ṛṣi.

4. —त—A. —ति—M. 5. —ल्य—M. —ल्ल—A.

6. रन्ध्रान्—M and A. But अन्ध्रान् seems to be the correct reading.

7. जलनिविड़प—R. जनपद—A. The portion is marked as doubtful (d) in M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सम्भोगान्ते मुकुलितदृशां[1] तत्र वाराङ्गनानाम्
अङ्गग्लानिं हर परिपतन् केलिवातायनेषु ॥ २१ ॥

खेल[2]द्वीचिप्रचयरचितानेकसोपानरेखं
तीरं यायाः फलभरनमत्पूगमालं पयोधेः ।
गायन्तीनां श्रवणसुभगं तत्र सिद्धाङ्गनानां
स्थाने स्थाने जनय घनकैस्तानशब्दानुवादान् ॥ २२ ॥

कुञ्जक्रीड़त्[3]विदग्धतरुणीकेलिनिश्वासवातै
र्म्लां[4]यद्वल्लीकिशलयरुचो निर्विशेर्विन्ध्यपादान्[5] ।
पश्यन् वक्त्राम्ब[6]नतिचतुरव्याध[7]सीमन्तिनीनां
माद्यद्गन्धद्विरदरसितत्रासलोलै[8]क्षणानि ॥ २३ ॥

२१। अनुग्रान् अन्ध्रजनपदान्। जनपदवधूभिर्गाढ़ा प्रविष्टा स्नानार्थमिति यावत् गोदावरी यत्र तान्। कलिङ्गनगरीं नाम कलिङ्गदेशराजधानीम् अनुसर।

२२। पूगी गुवाकतरुः।

२३। कुञ्जेषु क्रीड़न्तीनां विदग्धतरुणीनां देवाङ्गनानां केलिषु निश्वासवातैर्म्लायन्तीनां म्लानिं गच्छन्तीनां वल्लीनां ये किशलयास्तेषां रुगिव रुक् शोभा येषां तांस्तादृशान् विन्ध्यपादान्। माद्यन्तो ये गन्धद्विरदा हस्तिविशेषास्तेषां रसितात् शब्दात् यस्त्रासो भयं तेन लोलानि चञ्चलानि ईक्षणानि नेत्राणि येषां तानि वक्त्राणि मुखानि। 'स्वेदं मूत्रं पुरीषञ्च मज्जाश्चैव मतङ्गजाः। यस्याघ्राय विमाद्यन्ति तं विद्याद् गन्धहस्तिनम् ।'

---

1. —दृशां—R. —दृशां—M and A.
2. लेख—R and A. खेल—M.
3. —ड़ा—M and A. But क्रीड़त् seems to be happier.
4. —म्लां—R. म्ला—M and A.
5. —लान्—R. —दान्—M and A.
6. —म्य—M.
7. —वार—M. —व्याध—A.
8. —लालै—R. लोलै—M and A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्वेच्छारम्यं विहर विहगव्याकुलो[1]त्तुङ्गवृक्षे
विन्ध्योत्सङ्गप्रणयिनि वने मानवत्योऽपि यत्र ।
सञ्जायन्ते रहसि करिणां क्रूरमाकर्ण्य शब्दं
भर्त्तुः कण्ठे[2] प्रणिहितभुजावल्लयो (?)[3]भिल्लयोषाः ॥ २४ ॥

स्वैरक्रीड़ारसिकशवरीसिक्तरोधोनिकुञ्जां[4]
गच्छे रेवामभिनवशुकश्यामवंशीवनेन[5] ।
मन्यन्ते यत्परिसरभुवि प्रौढ़सीमन्तिनीनां
लीलामानग्रहमपि रतेरन्तरायं युवानः ॥ २५ ॥

लीलां नेतुं नयनपदवीं केरलीनां रतेश्चेत्
गच्छेः ख्यातां जगति नगरीमाख्यया तां ययातेः ।
गाढ़ाश्लिष्ट[6]क्रमुकतरवः प्राङ्गणे नागवल्ल्यो[7]
बाला यत्र प्रियतमपरीरम्भमध्यापयन्ति ॥ २६ ॥

---

२४ । विन्ध्योत्सङ्गप्रणयिनि विन्ध्यपादगते इति भावः । मानवत्यो मानिन्यः । मानिन्योऽपि भिल्लस्त्रियः तव करिरवमाकर्ण्य भीतभीताः भर्त्तारं दृढमालिङ्गन्तीति तव भयमेव मानभङ्गकारणं न तु भर्तृकृतप्रसाद इति भावः । 'भिन्नयोषाः भिन्नदेशीयाः स्त्रियः' इति (A)-धन्यधृतपाठव्याख्या ।

२५ । 'रेवा तु नर्म्मदा' इत्यमरः । वनेन उपलक्षितामिति शेषः । एतेनावन्त्यानां यूनां कामुकत्वातिरेकः सूच्यते ।

२६ । 'ताम्बूलवल्ली ताम्बूली नागवल्ल्यपि' इत्यमरः । ययातिनगरीति पुरविशेषस्य नाम । एतेन बाल्यादेव केरलीनां रतिविषयाभिज्ञत्वं व्यज्यते ।

---

1. —ल—M. —लो—A.
2. कण्ठे—A. कण्ठ—M. But the word is missing in R.
3: —भिन्न—M and A. But भिल्ल seems to give a better sense.
4. —ञ्जं—M. —ञ्जां—A. 5. —वलेन—M. —वनेन—A.
6. —श्रिष्ट—R. —श्लिष्ट—M and A.
7. —ल्यो:—R. —ल्ला:—M. —ल्ली—A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गङ्गावीचिप्लुतपरिसरः सौधमालावतंसो
[1]यास्यत्युच्चैस्त्वयि रसमयो विस्मयं सुह्मदेशः ।
श्रोत्रक्रीड़ाभरण[2]पदवीं भूमिदेवाङ्गनानां
तालीपत्रं नवशशिकलाकोमलं यत्र याति ॥ २७ ॥

तस्मिन् सेनान्वयनृपतिना देवराज्याभिषिक्तो
देवः सुह्मे[3] वसति कमलाकेलिकारो मुरारिः ।
पाणौ लीलाकमलमसकृद् यत्समीपे वहन्त्यो
लक्ष्मीशङ्कां प्रकृतिसुभगाः कुर्व्वते वाररामाः ॥ २८ ॥

यातस्योर्द्ध्वं[4] धनपतिनगेनेव गौरै[5]रगारैः
पश्चेस्तस्मिन् नगरमनघं चारु चन्द्रार्द्धमौलेः ।
यत्रानेकप्रियनखपद[6]व्याजतो[7] वाररामाः
भर्त्तुं भूषाशशधरकलाचिह्नमङ्के वहन्ति ॥ २९ ॥

२७। श्रोत्रक्रीड़ाभरणपदवीं क्रीड़ाकर्णभूषणत्वम्। 'भूमिदेवाङ्गनानां राजमहीषीणाम्' (A)। एतेन सुह्मेषु वसन्तागमो द्योत्यते ।

२८। 'देवराज्यं देवालयः' (A) लीलाकमलहस्ता वाराङ्गनाः कमला इव प्रतीयन्ते इति भावः ।

२९। धनपतिनगेन कैलासपर्व्वतेन । चन्द्रार्द्धमौलेर्हरस्य । गौरैरगारैरुपलक्षितं नगरं पश्चेरित्यन्वयः। 'ग्रीवाकुचे मक्रनखप्रहारो दत्तोऽर्द्धचन्द्राख्य उदीरितोऽसौ' इत्यनङ्गरङ्गः। नखप्रहारस्य चन्द्राकारत्वात् हरशिरोभूषया चन्द्रकलया साम्यम् इति भावः ।

---

1. वा—M. धा—A. But यास्यति seems to be happier.

2. —भवन—M. भरण—A.

3. साचाद—M. सुचाद—R. सुह्माद—A. But in the last it is corrected into सुह्मे व in the margin.

4. —सौरे—R and A. —सौर्द्धे—M.

5. गौधै—R. सौधै—M. गौरै—A.

6. —प्रियसखनखपद—R. —प्रियनखपद—A. The portion is marked as doubtful in M.

7. After व्याजतो, सुभगाः कुर्व्वते is again wrongly found in A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तत्रानर्घ्यं रघुकुलगुरुं स्वर्णदीतीरदेशे
नत्वा देवं व्रज गिरिसुतासंविभक्ताङ्गरम्यम् ।
याते यस्मिन् नयनपदवीं सुन्दरभ्रूलतानां
प्रौढस्त्रीणां गलति रमण[1]प्रेमजन्माभिमानः ॥ ३० ॥

तत् चैतच्च त्रिदिवसरितस्त्वान्तरा सेवनीयः
श्रीवल्लाल[2](?)क्षितिपतियशोबान्धवः सेतुबन्धः ।
आरूढ़ानां त्रिदिवतटिनीस्नानहेतोर्जनानां
यत्र द्वेधाप्यमरनगरी सन्निकृष्टा विभाति ॥ ३१ ॥

गङ्गां फेनस्तवकमुकुरं वीचिहस्ते वहन्तीं
सेवेथास्तामथ परिसरप्रौढ़हंसावतंसाम् ।
प्रत्यावृत्य व्रजति जलधौ प्रेयसि प्रेमलोला
कर्त्तुं केशग्रहमिव किमप्युद्यता[3] या विभाति ॥ ३२ ॥

तोयक्रीड़ारसनिपतत्-(?)[4]सुह्मसीमन्तिनीनां
वीचौ[5]धौतैः स्तनमृगमदः श्यामलीभूय भूयः ।

३०। स्वर्णदी भागीरथीति यावत्। गिरिसुतासंविभक्ताङ्गरम्यं देवम् अर्द्धनारीश्वरम् इति यावत्। प्रौढ़स्त्रीणां प्रकृष्टप्रेमवतीनाम् इति ध्वनिः। रमणप्रेम रमणे रमणस्य च प्रेम। गलति दूरीभवति अर्द्धनारीश्वरमूर्त्तिसंसूचितप्रेम्णोर्हरगौर्य्योः स्वापेक्षया प्रकृष्टप्रेमवत्त्वविज्ञानादिति भावः।

३१। द्वेधा स्नानजन्यपुण्येन अमरावतीसदृशविजयपुरराजधानीसन्निधानाच्च।

३२। अवतंसः कर्णभूषणम्। एतेन गङ्गायाः पत्युर्जलधेरुपरि आधिपत्यातिरेको व्यज्यते।

---

1. रमण—A and M. मरण—R.

2. —वल्लान—M. —वल्लाल—A. 3. —द्गता—A. —द्यता—M,

4. —तत् द्न—R. —ततद्न—M. —तद्न—A. But सुह्म and not न्नह्म seems to be the correct reading here.

5. —चि—M. which gives rise to a faulty metre. —ची—A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भागीरथ्यास्तपनतनया यत्र निर्याति देवी
देशं यायास्तमथ जगतीपावनं भक्तिनम्रः ॥ २३ ॥

संसर्पन्तीं प्रकृतिकुटिलां दर्शितावर्त्तचक्रां
तामालोक्य त्रिदशसरितो निर्गतामम्बु[1]गर्भात् ।
मा[2] निर्मुक्तासितफणिवधूशङ्कया कातरो[3] भू-
र्भीतः सर्व्वो भवति भुजगात् किं पुनस्त्वादृशो[4] यः ॥ २४ ॥

क्रीड़न्तीनां पयसि रभसात्तत्र लीलावतीनां
वीचीहस्तै रचय कुचयोरंशुकस्रंसनानि ।
सद्यस्तासामपि च रमणालोकनव्याकुलानां
यान्तु क्रीड़ामसृणहसितान्युत्तरीयाञ्चलत्वम् ॥ २५ ॥

[5]स्कन्धावारं विजयपुरम् इत्युन्नतां राजधानीं
दृष्ट्वा तावद् भुवनजयिनस्तस्य राज्ञोऽधिगच्छेः ।

२३। स्तनद्वगमदैः स्तनस्थैर्मृगमदैः। तपनतनया यमुना। जगतीपावनं तं देशं त्रिवेणीत्याख्यम् इति शेषः।

२४। तां यमुनां त्रिदशसरितो गङ्गायाः। असितः कृष्णवर्णः। 'निर्मुक्तो मुक्तकञ्चुकः'। अस्त्वीति यमुनायाः कृष्णत्वादिति भावः। सर्व्वः सकलः अथच शिवः। त्वादृशो भवादृशो यो वायुभुजां सर्पाणामाहारभूत इति यावत्।

२५। मसृणतया हसितस्य उत्तरीयाञ्चलत्वकल्पनम्।

---

1. —दम्ब—R. —तामम्बु—M and A.

2. मा—Missing in R, is found in A and is supplied in M.

3. —रा—R. रो—M and A.

4. —स्त्वदृशो—M. —स्त्वादृशो—A.

5. स—R and A. In explaining यत्, यत्र, यस्य etc. in the succeeding stanzas the word सन्धावार is invariably used in the marginal notes in A. स्क—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गङ्गावातस्त्वमिव चतुरो यत्र पौराङ्गनानां
सम्भोगान्ते सपदि वितनोत्यङ्गसंवाहनानि ॥ ३६ ॥

यत्सौधानामुपरि वड़भीशालभञ्जीषु लीना:[1]
सुस्निग्धास्तु[2] प्रकृतिमधुराः केलिकौतूहलेन ।
उन्नीयन्ते कथमपि रहःपाणिपङ्केरुहाग्र-
स्पर्शोद्गच्छत्पुलकमुकुलाः सुभ्रुवो वल्लभेन ॥ ३७ ॥

स्निग्धश्यामाश्मरमणमणिभि[3]र्बद्धमुग्धालवाला:
पौरस्त्रीभिः क्रमुकतरवो रोपिताः प्राङ्गणेषु ।
यत्रायत्नोपगतसलिलैर्नक्तमासिक्तमूला
नापेक्षन्ते[4] परिजनवधूपाणिविश्राणिताम्भः[5] ॥ ३८ ॥

गङ्गाश्लेषप्रकृतिविमले पालिते तेन राज्ञा
जाता लोकद्वितयविगलद्भीतयो यत्र पौराः ।

३६। स्कन्धावारः शिविरम्। 'स्कन्धावारोऽस्य तु स्थितिः शिविरम्' इति हेमः। एतेन गङ्गातीरवर्त्तित्वं विजयपुरस्य सूच्यते।

३७। वड़भी गृहचूड़ा। शालभञ्जी काष्ठादिपुत्तलिः। वल्लभेन कर्त्रा शालभञ्जीषु लीनाः अतएव पृथक्त्वेनाप्रतीयमानाः सुभ्रुव उन्नीयन्ते इत्यन्वयः। एतेन पुत्तलिकासुन्दर्योः समानशोभत्वं ध्वन्यते। इदमादिभिः षोड़शभिः श्लोकैर्विजयपुरवर्णनं प्रस्तौति।

३८। 'श्यामा रात्रिस्तस्या रमणश्चन्द्रः। चन्द्रकान्तमणिभिरित्यर्थः' (A)। विश्राणिताम्भः दत्तसलिलम्। रात्रौ चन्द्रकिरणसम्पर्कात् चन्द्रकान्तमणिभ्यो सलिलनिःसरणं भवतीति ते आलवाला अयत्नोपगतसलिलमयाः। एतेन महासमृद्धिमत्त्वं सूच्यते नगरस्य।

1.—ना :—A ; —ला :—M.

2. —सु—M. —सु—A.

3. —मानभि—R. —मणिभि—A and M.

4. —न्द्यन्ते—M. —क्षन्ते—A.

5. —श्रीणिताम्भः—M. —श्राणिताम्भः—A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बालाभ्योऽथ प्रणयकलहे रूढ़कोपाङ्कुराभ्यो[1]
विन्नस्यन्ति भ्रूकुटिरचनाचारुभीमाननाभ्यः ॥ ३९ ॥

आत्तं[2] कर्णात् प्रणिहितपदं साञ्जनैरङ्गुलैग्रै-
[3]र्बद्धं तापक्लपितबिसिनीतन्तुना बन्धनेन ।
यत्र स्त्रीणामधररुचकन्यस्तसिन्दूर[4]मुद्रं
तालीपत्रं प्रणयिनि जने प्रेमलेखत्वमेति ॥ ४० ॥

भर्त्तुः खैरं सुरतजनितस्वेदबिन्दून् विनेतुं
यत्र स्नेहादगणित[5]निजग्लानिभिर्मुग्धदारैः ।
सौधोत्सङ्गे[6] शशधररुचस्तन्तुजालप्रविष्टा
व्याकृष्यन्ते[7] रुचिरचमरीबालभारभ्रमेण ॥ ४१ ॥

वृद्धोष्माणः[8] स्तनपरिसराः कुङ्कुमस्याङ्गरागा
दोलाः केलिव्यसनरसिकाः सुन्दरीणां समूहाः[9] ।

३९। लोकहितयात् स्वर्गमर्त्त्ययो विंगलन्ती भीतिर्येषां ते तथा जाता इत्यर्थः। 'अत्र हेतुर्गङ्गा नृपतिपालनञ्च'। (A)

४०। आत्तं गृहीतम्। 'अन्योऽपि आकृष्य पत्रम् अञ्जनेन लिखित्वा तन्तुना बद्धा च प्रेरयति।' 'बिसिनी पद्मिनीत्याद्याः पद्मसम्बे' इति वैजयन्ती। तन्तुः सूत्रम्। 'सूत्राणि नरि तन्तवः' इति वैजयन्ती।

४१। चमरीकेशः चन्द्रकिरणश्च च इत्युभयोरैव शौक्ल्याद भ्रमः इति भावः। 'तन्तुजालप्रविष्टाः तन्तुरूपेण जाले गवाक्षे प्रविष्टाः' (A).

---

1. —रेभ्या—R. —राभ्यो—A and M.
2. आत्तं—A. स्वात्तं—M. 3. —र्बद्धं—A. —रद्धं—M.
4. —न्दुर—M. —न्दूर—A.
5. —खित—M. —णित—A.
6. —धात्सङ्गे—R. —धोत्सङ्गे—M and A.
7. —कृष्यन्ते—R. क्षप्यन्ते—A and M.
8. —ण—M. —णः—A. 9. —हः—R and A. —हाः—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्रीडावाप्यः प्रतनुसलिला मालतीदाम रात्रिः
स्यान[1]ज्योत्स्ना मुदमविरतं कुर्वते यत्र यूनाम् ॥ ४२ ॥

भ्राम्यन्तीनां तमसि[2] निविड़े वल्लभाकाङ्क्षिणीनां
लाक्षारागा[3] स्वरणगलिताः पौरसीमन्तिनीनाम् ।
रक्ताशोकस्तवकललितैर्बालभानोर्मयूखै-
र्नालक्ष्यन्ते रजनिविगमे पौरमार्गेषु यत्र ॥ ४३ ॥

रत्नैर्मुक्तामरकतमहानीलसौगन्धिकाद्यै-
श्चक्रे[4]र्लीलावलयरचनाबन्धुभि[5]र्विद्रुमैश्च ।
लोपामुद्रारमणमुनिना पीतनिःशेषवारः
श्रीः[6]सर्व्वस्वं हरति विपदं[7] यत्र रत्नाकरस्य ॥ ४४ ॥

मूकीभूतां मरकतमयीं हारयष्टिं दधाना
यस्मिन् बाला मृगमदमसीपिच्छिलेषु स्तनेषु ।

---

४२ । क्रीडावाप्यः मतीवीसप्ताः । प्रतनुसलिलाः स्वल्पनीराः । स्यानज्योत्स्ना व्याप्तज्योत्स्ना रात्रिरित्यस्य विशेषणम् । युवजनानन्दहेतुर्निखिल एव पदार्थस्तत्र वर्त्तते विजयपुरे इति विजयपुरस्य माहात्म्यातिरेक इति भावः ।

४३ । स्तवकः समूहः । नालक्ष्यन्ते ईदृक्तया नानुभूयन्ते लाक्षारागो बालसूर्य्यमयूखश्च द्वयुभयो रक्तत्वादिति भावः । तथा च तत्र पुराङ्गना निःशङ्कं रात्रौ वल्लभानभिसरन्तीति गम्यते ।

४४ । लोपामुद्रारमणमुनिना अगस्त्येनेति यावत् । पीतनिःशेषवारः पीतनिखिल-सलिलस्य । विद्रुमः प्रवालः । 'विद्रुमो ना प्रवालोऽस्त्री' इति वैजयन्ती । विविधरत्नादीनां तत्र सद्भाव इत्यहो महैश्वर्य्यं विजयपुरस्य ।

---

1. स्यान—A. स्यान—M.   2. यमसि—A. तमसि—M and A.
3. —गा—M and A but it is omitted in R.
4. —के—M. —क्रे—A.
5. —भि—M and A. missing in R.
6. श्री—R and A. श्रीः—M.   7. —पदं—R and A. —पुरुं—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चेतोवर्त्तिं[1] स्मरहुतवहं दीपितं स्नेहपूरैः
कृत्वा यान्ति प्रियतमगृहान् अन्धकारे घनेऽपि ॥ ४५ ॥

नीतं यत्नादविनयलिपेः पत्रतामायताक्ष्या
निर्गच्छन्त्यः सपदि हृदयं क्षालयित्वेव यत्र ।
कान्ते पादप्रणयिनि मिलत्कज्जलश्यामलानाम्
उन्मुच्यन्ते नयनपयसां श्रेणयो मानिनीभिः ॥ ४६ ॥

अग्रे तेषां व्यपगतमदः स्थातुमेवासमर्थो
दृष्ट्वा कान्तिं कुसुमधनुषः का कथा विक्रमस्य ।
सुभ्रू[2]लीलाचतुरनयनक्षेपरम्यैर्विलासै-
र्यस्मिन् यातास्तदपि सुदृशां किङ्करत्वं युवानः ॥ ४७ ॥

त्वय्यासीने मनसिजगुरौ यत्र सारङ्गनेत्राः
सन्दृश्यन्ते रचितचतुरोद्यानदोलाविलासाः ।
अभ्यस्यन्त्यः[3] सरभसमिव[4] व्योमकान्तारयानं
कन्दर्पस्य त्रिदिवयुवतीं जेतुकामस्य सेनाः ॥ ४८ ॥

४५। कामातिरेकादन्धकारादिजनितां बाधां न गणयन्तीति भावः ।

४६। 'एतेन मानभङ्गो व्यज्यते। बाष्पमोचणात् मानभङ्गो जायते इति कविपरम्परा।' (A) वल्लभकर्तृकपादग्रहणात्तत्रत्ययुवतीनां मानभङ्गो नान्यथेति भावः।

४७। 'तेषां यूनाम्'। (A) व्यपगतमदः दूरीभूतगर्व्वः। असमर्थः कामः इति शेषः। सौन्दर्य्येण तिरस्कृतमदना अपि यत्रत्या युवानः सलीलकटाक्षमात्रक्षेपैः यत्रत्ययुवतीनां किङ्करत्वं भजन्ते इत्येतादृशं रूपाधिक्यं पाटवञ्च तत्रत्यसुन्दरीणामिति भावः।

४८। सरभसं सहर्षम्। स्वर्गाङ्गनाभ्योऽपि समधिकरमणीया विजयपुराङ्गना इति भावः।

---

1. —र्त्तिं—M. —र्त्तिं—A. 2. —भ्र—R. —भ्रू—M and A.

3. —न्तः—M and A. But the correct reading appears to be—न्त्यः and in marginal note in A the word is explained as अभ्यासं कुर्व्वन्त्य इव।

4. —स इव—M. —समिव—A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रासादानां दिनपरिणतौ [1]गर्भदग्धागुरूणां
जालोद्गीर्णः [2]सजलजलदश्यामलो यत्र धूमः ।
सद्यःक्रीड़ाकुतुक[3]रभसारूढ़पौरीमुखेन्दु-
ज्योत्स्नासङ्गप्रहमरतमःश्रेणिशङ्कां तनोति ॥ ४९ ॥

व्यर्थीभूतप्रियसहचरीचाटुवाचां निशीथे
रोषादस्त्री[4]कृतकुवलयोत्तंसविस्रंसि[5]माल्यम् ।
यूनां यत्र प्रणयकलहं केलिहर्म्याग्रभाजाम्
इन्दुः प्रत्यादिशति सविधीभूय शश्वत् करेण ॥ ५० ॥

तत्र स्वेच्छारतिविनिमये चैव सीमन्तिनीनां
कर्णस्रंसि प्रकृतिसुभगं केतकीगर्भपत्रम् ।
उत्पश्यन्ति व्यतिकरचलत्कुण्डलाघट्टनाभि-
र्भिन्नं साक्षादिव सुखविधोः खण्डमेकं विदग्धाः ॥ ५१ ॥

४९। दिनपरिणतौ सायम्। जालोद्गीर्णो गवाक्षद्वारेण विनिर्गतः। प्रहमरं पलायनपरम्। सायं तत्र चन्द्राननाभिः सुन्दरीभिरालोकिता इव विभान्ति प्रासादा इति भावः।

५०। अस्त्रीकृतं कलहे अस्त्रस्वरूपतामापादितं। कुवलयोत्तंसात् कुवलयनिर्मित-शिरोभूषणात् विस्रंसि अधःपतितं माल्यं यत्र कलहे तत् कलहम्। यूनां युवानश्च युवत्यश्च तेषाम् इत्येकशेषः। प्रत्यादिशति निराकरोति। करेण हस्तेन अथच किरणेन। इन्दु-किरणानां कामोद्दीपकत्वात् तद्दर्शनतः स्वत एव प्रणयकलहो दूरीभवतीति इन्दुकर्तृकं कलहनिराकरणमुत्प्रेक्ष्यते।

५१। विदग्धा रसिका इति यावत्। 'छेको विदग्धः' इति हेमः।

---

1. ग—M and A but missing in R.
2. स—M and A but missing in R.
3. —तक—R. —तुक—M and A.
4. —श्री—A. —स्त्री—M.
5. —स्रंसि—A, —ध्वंसि—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वाचः श्रोत्रामृतमनुगतभ्रूविलासाः कटाक्षाः
रूपं ह्रस्वोच्चयसमुचितं[1] स्निग्ध[2]मुग्धाश्च हावाः[3]।
यातं लीलाञ्चितमकृतकं यत्र नेपथ्यमेतत्
पौरस्त्रीणां द्रविणसुलभा प्रक्रिया भूषणञ्च ॥ ५२ ॥

पुञ्जीभूतं जगदिव ततः सप्तकक्ष्या[4]निवेशै
रम्यं याया भवनमवनीमण्डलाखण्डलस्य ।
यत्सौधानां शिखरि[5]सुहृदां मूर्ध्नि विश्रान्तमेघे
विद्युल्लेखा वितरति मुहुर्वैजयन्तीविलासम् ॥ ५३ ॥

स्निग्धश्यामैरिव विरचिता दारितै[6]रिन्द्रनीलै
र्व्वापी तस्मिन्नवनिवनितारम्य[7]रोमावलीव ।
यस्यास्तीरे विहरदनतिप्रौढसीमन्तिनीनां
मन्ये लीलागतिषु गुरवो राजहंसा भवन्ति ॥ ५४ ॥

देवं साक्षान्मनसिजमिव प्राप्तराज्याभिषेकं
सेवेथास्त्वं व्यथित[8]समये चामरग्राहिणीभिः ।

५२। 'दग्धमुग्धाः भस्मसंसर्गेण मनोहराः' इति (A) ग्रन्थधृत-पाठव्याख्या। लीलाञ्चितं लीलायुक्तम्। अकृतकम् अकृत्रिमम्। द्रविणं धनम्। 'वित्तं च द्रविणं पुंसां हेमरूप्यात्मकं च तत्' इति वैजयन्ती। स्वभावसुन्दर्य्यस्तत्रत्याः कामिन्य आहार्य्यं भूषणं नापेक्षन्ते इति भावः।

५३। अवनीमण्डलाखण्डलस्य नरपतेरिति यावत्। शिखरिसुहृदां पर्व्वतसदृशानाम् अत्युन्नतत्वादिति भावः। 'पताका वैजयन्ती स्यात्' इत्यमरः।

५४। दारितैः विदीर्णैः। द्रावितैरिति पाठे तु द्रवीकृतैः।

---

1. —हितं—M. —चितं—A. 2. दग्ध—R and A. स्निग्ध—M.
3. —राः—R and A. —वाः—M. 4. —चा—M. —क्ष्या—A.
5. —खिरि—R. —खरि—M and A.
6. दारितै—R and A. द्रावितै—M. 7. —रा—A. —रो—M.
8. —व्यथित—M. —कथित—A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यस्य स्निग्धस्फुरदसिलतास्फार[1]गत्या जलानां[2]
लब्धः संख्ये रिपुकुलवधूलोचनैः[3] संविभागः[4] ॥ ५५ ॥

यस्यौत्सुक्यादसमसमरालोकनोन्माद[5]भाजां
स्वर्गस्त्रीणामपरिगणितस्रस्तचेलाञ्चलानाम्[6] ।
मन्ये धारा[7]चतुरतुरगोत्खातरेणुप्रतानः
सद्योलग्नः स्तनकलसयोरन्त[8]रीयत्वमेति ॥ ५६ ॥

भुग्नग्रीवं भुजविसलता[9]सक्तवक्त्राम्बुजाभिः
सोऽयं [10]सेनान्वयनृप इति त्रासकौतूहलाभ्याम् ।

५५। चामरग्राहिणीभिः सह इत्यर्थः। यस्य लक्ष्मणसेनस्य स्निग्धस्फुरदसिलतायाः स्फारगत्या गुरुगत्या रिपुकुलवधूलोचनैः सह जलानां संविभागस्तुल्यो भागो लब्धः इत्यन्वयः 'स्फारं वरिष्ठं विस्तीर्णं ततं बहु महद् गुरु' इति हेमः। लक्ष्मणसेनेन असिलतासञ्चालनमात्रेण बहुरिपुसंचयः क्षत इति ध्वनिः। अरिनगर्यादीनां वर्णनप्रसङ्गत इदमादिना श्लोकपञ्चकेन लक्ष्मणसेनस्य प्रतापातिशय्यं सूचयति ।

५६। 'चेलं वसनमंशुकम्' इत्यमरः। धारा अश्वगतिविशेषः। 'गतयोऽमूः पञ्च धाराः' इत्यमरः। अमराङ्गना अपि सविस्मयं तदीयं युद्धम् अवलोकयन्तीत्येतादृशं समरपाटवं लक्ष्मणसेनस्येति भावः।

---

1. —स्रा—R. —स्फा—A. —धा—M.
2. —लानां—A. —नानां—M.
3. —नैः—A. —नै—M.
4. —गाः—R. —गः—M and A.
5. —न्मद—R. —न्माद—A and M.
6. —चेलाञ्चला—A. —लीलाञ्चला—M. —लीलाञ्चना—R.
7. राधा—M. धारा—A.
8. —न्त—A. —न्त्व—M.
9. —लसता—R. —सलता—A and M.
10. —सेना—M and A. —सैना—R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विष्वक् पीतः कुवलयदल[1]श्रेणिदीर्घैः कटाक्षैः
पौरस्त्रीभिः सपदि नगरीविद्रवे[2] विद्विषां यः ॥ ५७ ॥

वस्त्राक्रन्दा[3] विहगरुदितैर्बिभ्रती चैत्तसीव
क्रीड़ागारे सुचिरलिखितामाकृतिं वल्लभस्य ।
प्रौढ़ारामा यदरिनगरी सौधसञ्जातदूर्व्वा-
जालव्याजादलकपटलीं दूरनम्रां बिभर्त्ति ॥ ५८ ॥

क्रीड़ारोषे सुतनुचरणा[4] हन्यमानस्य पत्युः
प्रत्युद्गच्छत्पुलकपटलेनापि बाधां दधाना ।
भ्राम्यन्त्यद्रेर्वनभुवि कथं क्रूरदर्भाङ्कुरायाम्
एवंप्रायो[5] यदरिनगरीग्रामिकाणां विलापः[6] ॥ ५९ ॥

तस्मिन् काले क्वचिदपि स चेद्वासरस्य त्रिभागं
राजा शक्तो गमयति रहश्चिन्तयन्नन्तरायान्[7] ।

५७। विष्वक् सर्व्वतः। विद्विषां नगरीविद्रवे शत्रुनगराणाम् आक्रमणकाले इति यावत्। विद्रव इति पाठे तु उपचारात् शत्रुनगराणामाक्रमणकारक इत्यर्थः। शत्रुनगराव-रोधवेलायामपि शत्रुकामिन्यः सकौतुकमेतस्मिन् वद्धनेत्रा भवन्तीत्यहो सौन्दर्य्यातिरेको लक्ष्मणसेनस्येति भावः।

५८। यस्य लक्ष्मणसेनस्य परिनगरी शत्रुपुरी शत्रुजनानां वधात् पलायनाद्वा सर्वथा निर्जना जातेति तत्रत्याः सौधनिचयाः तृणाकीर्णा विहगरवमुखराश्च संवृत्ता इति भावः।

५९। 'पीड़ा बाधा व्यथा दुःखम्' इत्यमरः। अतितरां सुखोचिता अपि यदीयाः शत्रुकामिन्यः पतीनां वधात् पलायमानाः पर्वतविचरणादिक्लेशमपि सहन्ते इति भावः।

---

1. —दल—M and A. But missing in R.
2. —वी—A. —वे—M.
3. —वस्त्रक्रन्दा—R. —वस्त्राश्रुसा—A. —वाक्रन्दा—M.
4. —वचना—M. —चरणा—A. 5. —यो—A, —या—M,
6. —सः—R. —पः—M and A.
7. —यन्नन्तरायान्—R. —यन्नन्तरायान्—A and M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सन्देशो मे न पवन तदा किञ्चिदावेदनीयः
कार्य्योत्तप्ते मनसि लभते नावकाशं विलासः ॥ ६० ॥

आसाद्यातः कमपि[1] समयं सौम्य वक्तुं विविक्ते
देवं नीचैर्विनयचतुरः कामिनं[2] प्रक्रमेथाः ।
अप्यन्येषु प्रणयिभिरभिव्यञ्जितः[3] कार्य्यभागः
सिद्धिं गन्तुं प्रभुरवसरे किं पुनः पार्थिवेषु ॥ ६१ ॥

श्रीखण्डाद्रेर्वसति शिखरे कोऽपि गन्धर्वलोक-
स्तत्रास्त्येका कुवलयवती नाम [4]मान्याङ्गनानाम् ।
दूतं तस्याः कलय[5] मलयो[6]पत्यकामारुतं मां
कामिद्वन्द्वं घटयति मिथो विप्रयुक्तं य एकः ॥ ६२ ॥

जित्वा देव त्वयि सरभसं दाक्षिणात्यान् क्षितीशान्
प्रत्यावृत्ते मलयकटकाच्चित्तमादाय तस्याः ।

---

६० । तृतीयो भागः विभागः । प्रभुः शक्तिशाली ।

६१ । विविक्ते रहसि निर्ज्जने स्थाने इति यावत् । प्रभुः समर्थः ।

६२ । मान्याङ्गनानां माननीयस्त्रीणाम् । कलय अवगच्छ । वसन्ते मलयपवन-प्रवहणावसरे एव विप्रयुक्तानां कामिनां मेलनस्य आनुभविकत्वात् मलयस्य कामिद्वन्द्व-घटकत्वमुपवर्णितम् ।

---

1. कथमपि—A. कमपि—M. 2. —नां—R and A. —नं—M.

3. —श्चाभिव्यञ्जित—A. —भिव्यञ्जित—M.

4. म—M and A. But in the latter it is corrected into मा in the margin.

5. —यी—R. —य—M and A.

6. मलयो—M and A, but missing in R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दूरं याते[1] कमितरि वृथा वृत्तिरस्येति[2] तस्या
वाष्पोत्पीड़ा सपदि पदवीं संरुरोधेक्षणस्य[3] ॥ ६३ ॥

विन्यस्याग्रं भुवि चरणयोः कौतुकोत्तम्भिताक्षी
त्वत्सम्पर्कप्रकृतिसुभगासुन्नतग्रीवमाशाम् ।
उत्पश्यन्ती[4] किमपि सुतनुर्लङ्घ्यते सौधशृङ्गाद्
उड्डिनाश्रुस्थगित[5]मसकृत् त्वत्समीपं यियासुः ॥ ६४ ॥

यस्मिन्[6] काले नयनविषयं साहसिन्यासि[7] नीतः
सारङ्गाक्ष्याः[8] सकलललना[9]लोचना[10]नन्दकारिन् ।
जाने तस्मात् प्रभृति[11] जनितस्वान्तसन्तापखेदा
सा रम्येषु क्वचिदपि न विश्वासमेकान्तमेति ॥ ६५ ॥

६३। सरभसं सवेगम्। मलयकटकात् मलयसानुदेशात्। कमितरि प्रिये दूरं गते सति अस्य ईक्षणस्य वृत्ति वृथा इत्यन्वयः। वाष्पोत्पीड़ा सपदि ईक्षणस्य पदवीं संरुरोध इत्यन्वयः। लोचनयोर्वाष्पाकुलतया तिरोहितासीत् तस्या दर्शनशक्तिरिति भावः।

६४। उत्तम्भिताक्षी विस्फारिताक्षी। "संवृतं पिहितं छन्नं स्थगितं चापवारितम्" इति हेमः। इदमादिभिः पञ्चविंशद्भिः श्लोकैः कुवलयवत्या विरहावस्थावर्णनं प्रस्तूयते।

६५। साहसिन्या कुवलयवत्या नयनविषयं दृक्पथं नीतः प्रापितः असीत्यन्वयः। 'चातके हरिणे पुंसि सारङ्गः' इत्यमरः।

---

1. —ते—R. —ने—M.

2. कमितरि वृथा वृत्तिरस्येति—A. किमित्तरियावृतिरश्येति—M.

3. —धेक्षणस्य—M. —ध चक्षस्य—A.

4. —पश्यन्ती—M. —पत्स्यन्ती—A. which has been corrected in the margin into—पश्यन्ती।

5. —स्खलित—A. स्थगित—M. 6. न—M and A. द—R:

7. —हसिन्यासि—A. —धु धन्योऽसि—M. But in R there seems to have been a lacunae here.

8. —क्ष्याः—M. —क्ष्याः—A.

9. —ललना—M and A. It is missing in R.

10. —नन्द—M and A. न is missing in R.

11. —ति—M and A. —त—R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मुष्टिग्राह्यं किमपि विधिना कुर्वता मध्यभागं
मन्ये बाला कुसुमधनुषो निर्म्मिता कार्म्मुकाय ।
राजन्नुच्चैर्विरहजनितक्षामभावं[1] वहन्ती
जाता सम्प्रत्यहह सुतनुः सा च मौर्व्वी लतेव ॥ ६६ ॥

कीदृक्[2] कान्तः कथय तरले वर्त्तते यस्त्वयान्त
र्यन्तादित्थं सुभग बहुशः [3]पृष्टयालीजनेन ।
निःश्वस्योच्चैः कथमपि तया स्तम्भिताश्रुप्रवाहा
न्यस्ता दृष्टिर्लिखितमदने भित्तिभागे गृहस्य ॥ ६७ ॥

धत्ते सद्यस्त्वदुपगमितप्रेमलेखभ्रमं सा
तालीपत्रे प्रियसहचरीकर्णपाशच्युतेऽपि ।
किञ्च क्रीड़ाशुकमपि मुहुः[3] पृच्छति त्वत्प्रवृत्तिं
गाढ़ोद्भूतः क्व खलु गणयत्यन्वयं त्वर्थिभावः ॥ ६८ ॥

नोत्तंसत्वं[4] क्षणमपि नयत्युत्पले बद्धकोपा
माल्यैः क्लान्ता न भुजलतिकामप्यसौ संवृणोति ।
पद्मोद्विग्ना हृदयनिहितात् तापसंपत्तिहेतोर्
आलीहस्तादपि च सहसा [5]मीलिताक्षी बिभेति[6] ॥ ६९ ॥

---

६६ । क्षामः क्षीणः । स्वत एव तन्वी सा विरहपीड़या तनुतरा सञ्जातेति भावः ।

६७ । कान्तस्य मदनसदृशत्वं सूचयतीति भावः ।

६८ । कर्णपाशः सुन्दरकर्णः । 'पाशो रज्जौ कर्णशब्दात् परः कर्णातिशायने', इति वैजयन्ती । एतेनोन्मादरूपोपवर्णिता कामदशा ।

६९ । उत्तंसत्वं कर्णभूषणत्वम् । एतेन दृशोरुत्पलसादृश्यं हस्तयोर्माल्याकारत्वं चालीहस्तानाञ्च पद्मतुल्यत्वं द्योतितम् ।

---

1. —वं—M and A. —ं—R. 2. —क्—M and A. —क—R.
3. —पृष्ठ—M. पृष्ट—A. 4. मुहुः—M and A. Omitted in R.
5. —त्वं सत्वं—M. —त्तंसत्व'—A. 6. मी—M and A. मि—R.
7. —भेति—M and A. —भाति—R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अभ्यस्यन्तौ सरसकुसुमस्वस्तरोः प्रान्तसुप्ता
घुष्यत्पङ्कप्रकरसफरीसम्भ्रमोद्वर्त्तितानि ।
धारावाष्पं नयननलिनीनालतां चानयन्तौ[1]
मन्ये बाला गमयति पुनः सा कथञ्चिद्दिनानि ॥ ७० ॥

अन्तस्तापं तुहिनपयसामप्यनुच्छिद्यमाप्य
त्वत्तो बाला मलयज[2]रजः[3]स्रोतसामप्यसाध्यम् ।
धत्ते निन्दां कुसुमविशिखेऽत्यन्तसाहस्यमूढ़ा
सुस्थापि स्यात् किमुत[4] विरहव्याकुला विभ्रमिण्यः[5] ॥७१॥

द्वेषः क्रीड़ाविपिनवसतौ[6] चन्दनाम्भोनिषेधः
प्रत्याख्यानं सरसनलिनीतालवृन्तानिलस्य ।
जातस्तस्यां कथमपि सखीबुद्धिज[7]स्त्वद्वियोगे
मूर्च्छावेगव्यपगमविधेरेष एव प्रकारः ॥ ७२ ॥

धत्ते द्वेषं शशिनि कुरुते न ग्रहं केशहस्ते
दूरे हारं क्षिपति रमते निन्दया चन्दनस्य ।

---

७० । स्वस्तरोः कल्पद्रुमस्य । प्रकरः समूहः । कल्पद्रुमसन्निधानेऽपि तस्या ईदृशी अवस्थेत्यहो दुःसहा तदीया विरहपीड़ा इति व्यज्यते ।

७१ । सुस्थापि अत्यन्तसाहस्यमूढ़ा स्यात् किमुत विरहव्याकुला विभ्रमिण्य इत्यन्वयः ।

७२ । मूर्च्छावेगव्यपगमविधिः कथमपि सखीबुद्धिज एष एव प्रकारो जात इत्यन्वयः । सखीवचनतो लीलोद्यानगमनादीनां कामोद्दीपकानां प्रत्याख्यानात् कथञ्चित् मूर्च्छावेगोपशमो जात इति भावः ।

---

1. The reading of the line as given in the text is found in A. R has धारावाष्पं नयनगलनीलालतां चालयन्तौ M. has धारावाष्पैर्नयनगलितैः कुन्तलं चालयन्तौ ।

2. —ज—M and A. Omitted in R.

3. —स्रो—M and A. —श्री—R. 4. —सुत—A. —मिह—M.

5. —न्यः—M. —ण्यः—A. 6. —सतौ—M and A. —सुतौ—R.

7. —स्त—M and A. Omitted in R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वक्तुं देव त्वयि परमसौ स्वाम[1]वस्थां कथञ्चिद्
गाढ़ोद्वेगा नयति कवितांचिन्तया वासराणि ॥ ७३ ॥

आदौ यातो[2] नयनपदवीं स्तम्भयन् पक्ष्ममालां
चुम्बन् गण्डस्थलभुवमथो पीतबिम्बाधरौष्ठः[3] ।
कुर्वन् कण्ठग्रह[4]मपि कुचोत्सङ्गशय्याशयान-[5]
स्तस्या वाष्पः किमिव न खलु त्वद्वियोगे करोति ॥ ७४ ॥

शारङ्गाख्या जनयति न यद् भस्मसादङ्गकानि
त्वद्विश्लेषे स्मरहुतवहः श्वाससन्धुक्षितो[6]ऽपि ।
जाने तस्याः स खलु नयनद्रोणिवारां प्रभावो
यद्वा शश्वन्नृप तव मनोवर्त्तिनः शीतलस्य ॥ ७५ ॥

शान्तप्राये रजनिसमये किञ्चिदामीलिताक्षी
प्राप्य स्वप्ने[7] कथमपि पुरस्त्वामतिप्रौढ़रागा ।

७३। केशहस्ते केशसमूहे। "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" इत्यमरः। अन्यत्र वीतरागा सा त्वच्चिन्तयैव दिवसमतिवाहयतीति भावः।

७४। त्वद्विरहे अनारतं रोरुद्यमानायाः कुवलयवल्या वाष्पराशिर्गण्डस्थलादिषु प्रवहतीति भावः।

७५। सन्धुक्षितः उद्दीपितः। 'द्रोणिः काष्ठाम्बुवाहिनी' इत्यमरः। नयने द्रोणी इव द्रोणिविशेषस्य नयनाकारत्वादिति भावः। रोदनादेव तस्या मदनतापः कथञ्चिदुपशमं गतः, जितकामस्य शान्तस्य भवतोऽविच्छिन्नचिन्तया वा इति भावः। प्रसिद्धा च रोदनेन दुःखस्य शैथिल्येन तापस्य चोपशान्तिः।

---

1. मामा—R. माम—M. स्वाम—A.
2. —ते—M. —तो—A.
3. —रौष्ठे:—R: —रौष्ठ:—A. —रोष्ठ:—M.
4. —ग्रह—M and A. —ग्रय—R.
5. —न—M. —सु—A. 6. —क्षुक्षितो—A. —क्षिपे—M.
7. —प्ने—M and A. —प्ने—R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

[1]श्लिष्यन्ती त्वां[2] तनुमनुपदं विप्रबुद्धाथ[3] बाला
लज्जालोलं वलयति मुखं सा सखीनां मुखेषु ॥ ७६ ॥

चन्द्रादस्या[4]मुपवनभुवं दूरतो द्वेष्टि बाला
नालापञ्च क्वचन कुरुते सार्द्धमालीजनेन ।
रक्षाहेतोः स्मरविशिखतः[5] केवलं सा वराकी
धत्ते लीलाफलकमुरसि त्वत्प्रतिच्छन्दशोभि[6] ॥ ७७ ॥

विन्यस्यन्ती[7] शशिनि नयने दुर्दिनैरम्बुवारां
धाराश्वासै[8]र्वकुलकुसुमामोदमाघ्रातुकामा ।
शुश्रूषुश्च भ्रमरविरुतं मूर्च्छया रचितासौ
वीक्ष्यावस्थां क इव करुणाकातरः स्यान्न तस्याः ॥ ७८ ॥

७६। विप्रबुद्धा जागरिता। वलयति सञ्चालयति। निद्रावसरेऽपि—का कथा कालान्तरेषु—सा त्वच्चिन्तारता स्वप्नेषु त्वत्सङ्गमसुखमनुभवतीति भावः।

७७। स्मरविशिखतः कामबाणतः। प्रतिच्छन्दः प्रतिकृतिः। सौन्दर्य्येण पराक्रमेण वा जितकामस्य भवतश्चित्रफलकं भवत्प्रतिपक्षभूतस्य मदनस्य भयोत्पादनार्थं मदनार्त्ता स्वोरसि धारयतीति भावः।

७८। अश्रुभिः चन्द्रदर्शनात् दीर्घश्वासैर्वकुलकुसुमगन्धाघ्राणात् मूर्च्छया च भ्रमरशब्द-श्रवणात् वारिता सा इत्यर्थः। अश्रुपतनादिकारणात् चन्द्रदर्शनाद्युक्तैककृत्यसम्पादनेऽसमर्था सेति अश्रुपतनादयोऽपि तस्या उपकारायैव संवृत्ता इति भावः।

---

1. श्लि—M and A. श्नि—R.

2. त्वा—A. where it has been corrected into त्वां in the margin. त्वां—M.

3. —द्धाथ—M and A. But द्धा is the grammatically correct reading.

4. —स्या—M and A. —स्मा—R. 5. —खितः—M. —खतः—A.

6. —भि—M. —भिः—R and A.

7. —स्यन्ती—M and A. —श्यन्ती—R.

8. —श्वासै—M and A. —श्वाःसै—R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चेतोवृत्तिः स्फुरति करुणा विप्रयोगे विरागः
कोपावेशः कुसुमविशिखे नित्यमात्मन्यवज्ञा[1] ।
इत्थं [2]स्वाङ्के स्थितमिव समालम्ब्य चिन्ता वराकी
त्वय्येकान्तस्थिरविरचितं भावमाविष्करोति ॥ ७९ ॥

प्रागालापाः प्रतिमुहुरपि प्रेमरम्याः सखीनां
त्वय्येकान्तव्यपगतदये सङ्गमाशापि नैव ।
तस्याश्चिन्तां[3] विरहजनितां[4] नाथ विस्मारयन्ती[5]
मूर्च्छैवैका[6] भवति सततं [7]जीविताालम्बनाय ॥ ८० ॥

तस्या राजन्ननुभवमना[8]स्सायहस्तावरोधाद्
गण्डाभोगे नयनसलिल[9]स्रोतसा क्षालितोऽपि ।
प्रत्यासन्नः स्तनपरिसरे चेतसा त्वां वहन्त्याः
प्रालेयांशुर्नृपतिककुदच्छत्रभङ्गीं बिभर्त्ति ॥ ८१ ॥

---

७९ । चित्रमेतद् यत् सा भवति एकान्ततोऽनुरक्ता तद्विरहे भवतः क्लेशादिकमेवा-लोचयति न तु आत्मन इति भावः ।

८० । केवलं मूर्च्छावकाशे एव सा त्वच्चिन्ताविरहिता भवति नान्यदेति भावः । एवञ्च चिन्ताविच्छेदादविच्छिन्नचिन्तापरम्परा तस्या मृत्युकारणं न भवतीत्यर्थः ।

८१ । प्रत्यासन्नः प्रतिबिम्बितः । प्रालेयांशुश्चन्द्रः । ककुदो राजचिह्नम् । गण्डादिषु प्रतिबिम्बितश्चन्द्रः तदीयहृदयगतस्य राज्ञो भवतश्छत्रम् इव शोभते इति भावः ।

---

1. —त्मन्यवज्ञा—A. —मैन्यवज्ञा—M. where a sign of query was put after न्य indicating the obscurity of the passage.

2. स्वा—M. र—A. where it has been corrected into स्वा in the margin.

3. —न्तां—A and R. —न्ता—M. 4. —तां—A and R. —ता—M.

5. —स्मारयन्ती—R. —स्मारयन्ती—M and A.

6. मूर्च्छैवैका—A. मुचैरैका—R. उच्चैरैका—M.

7. जीवि—M and A. जीव—R.

8. —ना—M and A. —न—R. 9. —ल—M and A. —ला—R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यातः कृच्छ्रा[1]त्तुहिनसमयः सम्प्रति त्वत्सकाशाद्
आगच्छन्तीं [2]पवनलहरीमप्यनासादयन्त्याः[3] ।
कः सन्नद्धे[4] परभृतवधूकेलिवाचाललोले
चैत्रे तस्याः कथय सुभग प्राणरक्षाभ्युपायः ॥ ८२ ॥

भूयोभूयः प्रविशति मनो दारुणे मन्मथाग्नौ
मग्नं वाष्पाम्भसि नयनयोर्द्वन्द्व[5]मिन्दीवराक्ष्याः ।
तस्या राजन्नतनुविरहव्याकुलायास्तपस्वी
जातो भस्मच्छुरित इव स क्षामपाण्डुः कपोलः ॥ ८३ ॥

राज[6]न्नुर्वीवलयवनिताकामुक त्वत्सकाशा-
दाशातन्तुर्भवतु सुदृशो दुर्लभः प्रेमतन्तुः ।
कष्टात् कष्टं पुनरिदमहो स्वप्न[7]सङ्केतदूती
निद्राप्यस्याः क्षणमपि न यन्नेत्रसीमानमेति ॥ ८४ ॥

८२। हिमर्त्तौ उत्तरतो वायोः प्रवहणात् दक्षिणदिग्वर्त्तिन्यास्तस्या उत्तरदेशावस्थितस्य राज्ञः सकाशादागच्छतो वायोरुपलम्भो ग्रीष्मे तु दक्षिणतो वायोः प्रवहणात् न तथा इति भावः ।

८३। द्वन्द्वं युगलम्। छुरितः व्याप्तः। मदनानले मानसं प्रविशति दुःखेन मानसात्मीयभूतं नयनयुगलं रोदनपरं भवति कपोलश्च भस्मनात्मानमाच्छादयति आत्मीयान्तर-मितीति भावः। मदनतापेन पाण्डुतां गता सा सततं रोदितीति सूच्यते ।

८४। निद्राभावात् स्वप्नेऽपि सा त्वत्सम्भोगसुखमुपभोक्तुं नालं भवतीत्यहो अतिदारुणं तस्या भागधेयमिति भावः।

---

1. —च्छ्रा—A and M. —च्छ्र—R. 2. प—M and A. स—R.
3. —स्वादयन्त्याः—M and A. —शादयन्त्याः—R.
4. —न्नद्धे—A. —स्वन्धे—R. —स्वद्ध—M.
5. —द्वंन्द्व—A. —द्वंन्द्व—M.
6. —न्न—M and A. —न्ना—R.
7. —श्न—A. —स—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्यावृत्ताः[1] स्तनपरिसराच्चन्दनस्फीतमूर्त्तेः
श्वासा एव[2] स्मरहुतवहोद्दीपनैकप्रगल्भाः ।
तामुत्कण्ठाकुलितहृदयां खेदयन्ति प्रकामं
संप्राप्यन्ते मलयपवनैरेवमेवायशांसि ॥ ८५ ॥

त्वद्वक्त्रानुस्मरणरसिका कातरा च प्रकामं
ज्योत्स्नासेके द्विजपतिमधिक्षेपपात्रं[3] करोति ।
किञ्च द्वेष्टि त्रिदशभिषजौ सुन्दर त्वां विचिन्त्य
प्रायेणैवं भवति विधुरासन्नमृत्योर्मनीषा ॥ ८६ ॥

सा वैरस्यादसितनयना हेमतालीदलानां[4]
प्रत्याख्यानात् प्रकृतिसुभगं कर्ण[5]पाशं बिभर्त्ति ।
तदङ्गात्राणां किमपि सहसा दुर्बलत्वं विचिन्त्य
त्यक्तं त्रासाद् गुणमिव मनोजन्मना कार्म्मुकस्य ॥ ८७ ॥

८५। मलयपर्व्वतोऽपि चन्दनवृक्षभूयिष्ठ इति लिप्तचन्दनस्य स्तनपरिसरस्य मलयरूपेण तत्प्रभवस्य श्वासस्य च मलयपवनरूपेण कल्पनम्। श्वासानां च वायुस्वरूपतया अनलात्मकस्य मदनस्य श्वासैनैवोद्दीपनं भवतीत्याशङ्का मलयरूपेणोपचरितं श्वासमेव स्वकीयतापकारणतया निन्दतीति भावः।

८६। द्विजपतिश्चन्द्रो ब्राह्मणश्रेष्ठश्च। त्रिदशभिषजौ अश्विनौ द्वेष्टि तयोः सौन्दर्य्यातिरेकस्य प्रसिद्धत्वात्। अन्योऽप्यासन्नमृत्युः शान्तिस्वस्त्ययनादिना औषधादिप्रदानद्वारेण च रोगोपशमनसमर्थं स्वीयमङ्गलनिदानभूतं ब्राह्मणं भिषजं च निन्दतीति ध्वनिः।

८७। वैरस्यात् वैराग्यात्। असितं कृष्णम्। प्रकृतिसुभगं स्वभावसुन्दरम्। हेमतालीदलानां स्वर्णतालपत्राणां कर्णभूषणभूतानामिति यावत्। तद्देहस्य मदनकार्म्मुकसादृश्यात् हेमतालीदलादीनां तदीयभूषणानां तत्कार्म्मुकगुणत्वम्। अतिदुर्बलं धनुर्गुणधारणे

---

1. —त्ताः—A. —त्ता—M.　　2. एव—A. इव—M.
3. —पात्रं—M. —मात्रं—R and A.
4. —लानां—M and A. —धानां—R.
5. कर्ण—A. कर्म—R. केश—M.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अप्याजन्मप्रभृतिसुहृदश्चन्द नस्यापराधाद्[1]
अध्यास्ते सा न खलु मलयोपत्यकाकाननानि।
किञ्च द्वेषादुपरि मदनस्येव सर्व्वाङ्गतन्वी
बद्धाविशा मनसि रतये नावकाशं ददाति ॥ ८८ ॥

[2]लीलोद्याने वितरति[3] दृशं[4] यत्नसंरुद्ध[5]वाष्पा[6]
सान्द्रे चन्द्रार्च्चिषि निविशते चन्दनाभ्यक्तगात्री।
क्रीड़ावापीं[7] मरुदभिमुखं[8] धावति व्याकुलासौ
किं वा[9] नार्य्यो रमणविरहे साहसं नाचरन्ति ॥ ८९ ॥

न प्रभवतीति मदनेन दूरीकृतमिव गुणीभूतमलङ्करणादिकमित्युत्प्रेक्षा। सर्व्वती वीतरागा कुवलयवती अलङ्करणादिकं परित्यक्तवतीति ध्वनि:।

८८। रतये आनन्दाय मदनभार्य्यायै च। कदापि न मुदं दधातीति भाव:।

८९। लीलोद्यानगमनादीनां कामोद्दीपकानां विरहिभिरकर्त्तव्यत्वात् एतेषां साहसत्वम्। स्वजीवनं प्रति अनुरागलवाभावात् अत्यर्थं पीड़िता सा तापातिरेकजनकमपि चन्द्रालोकादिसेवनमाचरति। यद्वा मदनेन तापिततापिता सा लुप्तहिताहितविवेका तापोपचायकमपि कृत्यजातं नि:शङ्कमाचरतीति भाव:।

---

1. —श्चन्दनस्यापराधाद्—M and A. —श्चन्दस्यापर:धाद्—R.

2. लीलो—A. पीनो—M.

3. —तरति—A and R. —चरति—M. 4. भ्रमं—M. दृशं—A.

5. —द्ध—A and M. —ध्य—R.

6. —स्पा—R. —ष्पा—M and A.

7. —पीं—A. —पीमभि—M. where the reading is marked as doubtful.

8. —भिमुखं—M and A. मुखं—R.

9. किम्वा—M and A which form, however, is grammatically wrong, the व here being a semivowel, and not a labial mute. The two grammatically correct forms are किव्वाँ and किंवा। But in verses 94 and 100 also, which follow, we get the reading किम्वा both in M and A.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यातः[1] कण्ठस्थलमपि घनश्वाससमात्रावशेषा-
स्तामुत्कण्ठा[2]प्रतनुमसवः सर्वथा न त्यजन्ति ।
लब्ध्वा कण्ठप्रणयमथवा तादृशामङ्गनानां
शक्तास्त्यागे क इव भुवने चेतसा विच्युतोऽपि ॥ ९० ॥

क्षीणस्तापो वपुषि विगता नेत्रयोरश्रुधारा
विश्रान्तानि क्रमकृशतनोरङ्गविक्षेपणानि ।
इत्थं शान्ते विरहजनिते व्याधिरागे मृगाक्ष्याः
श्वासस्तस्याः परमुपचितो [3]निर्वृतेरन्तरायः ॥ ९१ ॥

लीलोद्याने परभृतवधूपञ्चमैः पीड्यमाना[4]
ताम्यन्मूर्त्तिर्मलयमरुता केलिवातायनेषु ।
सा नैकत्र क्वचिदपि पदं कातराक्षी विधत्ते
यत् सत्यं न त्रिभुवनमपि प्रीतये दुःखितानाम्[5] ॥ ९२ ॥

सा सर्व्वंचाप्रतिहतगति[6]र्व्विद्यया सत्यपि त्वां
प्रत्याख्यानात् सुभग सहसा बिभ्यती नाभ्युपैति ।

---

९० । उत्कण्ठाप्रतनुम् उत्कण्ठावशात् क्षामम् । कण्ठागतजीवना मृतापि मृतप्राया सा मदनतापेनेति भावः ।

९१ । उपचितो वृद्धिं गतः । निर्वृतेः सुखस्य मृत्युरूपस्य । मृतप्रायायास्तस्यास्तिरोहिता निखिला चेष्टा, अवशिष्यते च केवलं श्वास इति भावः ।

९२ । ताम्यन्ती क्लिश्यन्ती मूर्त्तिर्यस्याः सा । लीलोद्यानादिषु सर्व्वत्रैव कामोद्दीपकाः पदार्थनिचयास्तामतितरां पीड़यन्तीति भावः ।

---

1. —ताः—A. —ता—M. 2. —ण्ठां—A. —ण्ठा—M.
3. —निर्वृ—A. —निवृ—M. 4. —ने—M. —ना—A.
5. दुःखितानां—M. दुख्खितानां—A and R.
6. —र्व्वि—A and M. वि—R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राजानो हि प्रकृतिरसवञ्चेतसोऽप्यन्यनारीं
रूढ़प्रेमप्रबलवनिताभीरवो नो लसन्ति ॥ ९३ ॥

तस्यास्तीव्रस्मरहुतभुजा दह्यमानाङ्गयष्टे-
र्न्यस्तं सद्यः स्तनपरिसरे चन्दनं शोषमेति ।
उक्तैः किंवा बहुभिरपदारोपितस्वान्तवृत्ते-
स्त्वय्यायत्तः कुवलयदृशो जीवरक्षाप्रकारः ॥ ९४ ॥

इत्याख्याते पुलकिततनुर्मेदिनीपुष्पकेतुः
प्रत्युत्थाय प्रणयसुभगं गाढ़माश्लिष्यति त्वाम् ।
वाक्यैरेभिः [1]करुणमसृणैः कोमलत्वं भजन्ते
ग्रावाणोऽपि प्रकृतिसरसः किं पुनस्तादृशो यः ॥ ९५ ॥

सद्यः कृत्वा पवन विनयादञ्जलिं मूर्ध्नि किञ्चिद्
वक्तव्योऽसौ रहसि भवता मद्गिरा गौडराजः ।
त्वत्तः श्रोष्यत्यवहितमना सोऽनुरक्ताङ्गनानां
जायन्ते हि प्रणयिनि सुधावीचयो वाचिकानि ॥ ९६ ॥

९३। प्रत्याख्यानात् बिभ्यतीत्यन्वयः। लसन्ति कामयन्ते। प्रत्याख्यानभयादेव सा भवदन्तिकं नोपैति इति भावः। उक्तञ्च 'अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे' इति

९४। अपदारोपितस्वान्तवृत्तेः दुर्लभजनानुरक्तचित्ताया इत्यर्थः।

९५। मेदिन्यां पृथिव्यां पुष्पकेतुर्मदन इव लक्ष्मणसेनः सौन्दर्यातिरेकादिति भावः। त्वां प्रणयसुभगं यथा स्यात्तथा गाढ़माश्लिष्यति त्वदीयवचने स्वाभिमतप्रकटनार्थमिति भावः।

९६। अनुरक्ताङ्गनानां वाचिकानि वचनसमूहाः प्रणयिनि जने सुधावीचय इव भवन्तीति अन्वयः।

---

1. कर—A and R. करु—M. The marginal note in A explains करुण as श्रवणादि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पार्श्वे पश्चादपि च पुरतो दर्शयन्नात्मरूपं
व्यक्तं देव त्वमसि जगतामीश्वरः शार्ङ्गपाणिः ।
तन्मां भक्तिप्रवणमनसं नानुरुन्धासि कस्मात्
कायव्यूहं रचयितुमलं नापरः कैटभारेः ॥ ९७ ॥

सौधोत्सङ्गे मुकुलितदृशं तत्सखीनां पुरस्तान्
मामासाद्य त्वमयमकथा गोचरे यत्र वाचाम् ।
तत् कुर्व्वीथाः सुभग न सतां गर्हणीया[1] यथा स्यां
कन्यां[2] लोके[3] न खलु सुधियो [4]दूषयित्वा त्यजन्ति ॥ ९८ ॥

वृत्ते गौरीपरिणयविधौ [5]पीवरप्रीतिभाजा
सृष्टस्येव त्रिपुरजयिना पुष्पकेतो[6]र्नवस्य ।

९७। कैटभारेर्नारायणात्। त्वदनुरक्तचित्ता सर्व्वत्रैव त्वामहं प्रत्यक्षीकरोमीति भवान् विश्वरूपधारी कृष्ण एव नापर इति भावः। कृष्णस्य इव च भवतोऽपि सम्भाव्यते बहुकलत्रोपभोग इति ध्वनिः। एतेन अवरोधबहुत्वेऽपि न मद्ग्रहणे भवतः कापि वर्त्तते बाधा इति सूचितम्।

९८। तत् तदा सखीनां पुरस्तात् मुकुलितदृशं माम् आसाद्य अयं त्वं वाचां गोचरे यत् न तत् भोगादिकं अकथा तत् तस्मात् यथा अहं गर्हणीया न स्याम् तथा कुरु इत्यन्वयः। परिग्रहत्वेन मामपि स्वीकुरु इति भावः।

९९। सञ्जाते गौरीपरिणये प्रमुदितचेतसा भगवता महेश्वरेण नूतनः कश्चित् मदनः समुत्पादितो लावण्यसीनरूपः मदनमन्तरेणेदृशसौन्दर्य्यस्यान्यत्र दुर्लभत्वात् इति भावः।

---

1. —णीया—M and A. —णीया—R.
2. —न्या—M. —न्यां—A.
3. —कां—M. —के—A and R.
4. भू—M. दू—A.
5. पी—M. प्री—A.
6. —तो—M and A. —तु—R.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राजन्नस्तु प्रणयचतुरो दूरतः प्रेमबन्धः
पुण्येन स्यां तव चरणयोः केन संवाहनेऽपि ॥ ९९ ॥

सन्देशोऽयं मनसि निहितः कच्चिदायुष्मता मे
किंवा भूयस्त्वयि विरचितैरङ्ग भिक्षाप्रकारैः ।
परार्थ्यैक[1]प्रवणमनसस्त्वद्विधा वाष्पमिश्रान्
आपन्नानां न खलु बहुशः काकुवादान् सहन्ते ॥ १०० ॥

—— ० ——

दन्तिव्यूहं कनकलतिकां चामरं हैमदण्डं
यो गौड़ेन्द्रादलभत कविक्ष्माभृतां चक्रवर्त्ती ।
श्रीधोयीकः सकलरसिकप्रीतिहेतोर्मनस्वी
काव्यं सारस्वतमिव [2]महामन्त्रमेतज्जगाद (क) ॥ १०१ ॥

संवाहनेऽपि स्याम् समर्था इति शेषः । भार्य्यात्वेन मां नाङ्गीकरोषि चेद्दासीत्वेनापि मम ग्रहणं भवत्विति निष्कृष्टार्थः ।

१०१ । इदमादिना श्लोकचतुष्टयेन कविः स्वपरिचयं प्रकटय्य स्वनिबन्धस्थायित्वं प्रार्थितवान् स्वां तत्त्वज्ञानस्पृहां च सूचितवान् । महामन्त्रत्वञ्चास्य सकलरसिकजनसम्मोहनहेतुतया इति भावः ।

---

1. —र्थ्यैक—A. —र्थैक—M.
2. महा—A. सतन्—M ; a lacunae here in R.

(क) This verse, in an altered form, occurs in the *Saduktikarnāmṛta* where the first half shows little difference from the reading as given above, the only difference being कनककखितं in place of कनकलतिकाम् and हैमदण्डं in place of हैमदण्डं । The second half as it occurs in the above work runs as follows—

ख्यातो यश्च श्रुतिधरतया विक्रमादित्यगोष्ठी-
विद्याभर्त्तुः खलु वररुचेराससाद प्रतिष्ठाम् ॥

(J. A. S. B—1906—P. 15)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गोष्ठीबन्धः सकल[1]कविभिर्वाचि वैदर्भरीति-
र्वासो गङ्गापरिसरभुवि स्निग्धभोग्या विभूतिः ।
सत्सु स्नेहः सदसि कविताचार्य्यकं भूभुजां मे
भक्तिर्लक्ष्मीपतिचरणयोरस्तु [2]जन्मान्तरेऽपि ॥ १०२ ॥

यावच्छम्भुर्वहति गिरिजा[3]संविभक्तं[4] शरीरं
यावज्जैत्रं कलयति धनुः कौसुमं[5] पुष्पकेतुः ।
यावद्राधारमणतरुणी[6]केलिसाक्षी कदम्ब-
स्तावज्जीयात् कविनरपतेरेष वाचां विलासः ॥ १०३ ॥

कीर्त्तिर्लब्धा सदसि विदुषां शीतलक्षोणिपाला
वाक्सन्दर्भाः कतिचिदमृतस्यन्दिनो निर्म्मिताश्च ।

१०२। भूभुजां सदसि कविताचार्य्यकमित्यन्वयः ।
१०३। राधारमणः कृष्णश्च तरुणी गोप्यश्च तेषां केलिः विहारस्तस्य साक्षी ।

---

1. सरस—A. सकल—M.

2. ज—M and A. य—R.

3. —जा—M, A, P. —जां—R.

4. —विक्तं—A, R, P. —भक्तं—M. In A—विक्तं is corrected into भक्तं in the margin.

5. —सुमं—A.—समं—P.—तुकं—M.

6. —रणी—M. —वणी—A and P.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तीरे सम्भ्रत्यमरसरितः क्वापि [1]ग्रैलोपकण्ठे
[2]ब्रह्माभ्यासे प्रयतमनसा नेतुमीहे दिनानि ॥ १०४ ॥ (क)

इति श्री[3]धोयी[4]कविराजविरचितं पवनदूताख्यं[5] काव्यं[6] समाप्तम् ।

१०४। शीतलाः शान्ताः परिदृश्ता इति यावत् चौषिपाला नरपतयो येभ्यस्ते तादृशा शब्दसन्दर्भाः। ब्रह्माभ्यासे ब्रह्मणोऽभ्यासेऽनुशीलने ब्रह्माधिगमार्थम् ध्यानादिके क्रियाकलापे इत्यर्थः।

---

1. ग्रैलो—A, P. ग्रैलो—M.
2. ब्र—M and A. ब्रा—P.
3. श्री—M. Omitted in A and P.
4. धोयीक—M. धोयी—A and P.
5. —ख्यं—M and P. —ख्य—A.
6. काव्यं—A and P. Omitted in M.

(क) This verse, also, is quoted in the *Saduktikarṇāmṛta* where the only variants are चोयि for चौयि, प्रवणमनसा for प्रयतमनसा and ग्रैलोप for ग्रैलोप—J. A. S. B—1906—P. 15.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

INDEX I.

Index to the first lines of the verses of the Pavanadūta.

(The numeral figures refer to the number of verses)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA